This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 303 विषय काव्य

नाव. भारतचम्पू (१ स्तबक) मुद्रित

लेखक/लिपीकार अनंतभट्ट

पृष्ठ 25 काळ शके 1786 पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथचंपूभारतेनवमस्तबकः प्रारभ्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ ॥अथचंपुभारतसटीकनवमस्तबकःप्रारभ्यते॥ ॥अथयुद्धनिश्चयानंतरंरथगजाश्वपदातिभिः संरुद्धपार्श्वभागाःते
उभयेद्विविधाइत्यर्थः कुरवःकुरुवंशोद्भवाःयुधिष्ठिरादयोदुर्योधनादयश्चरणायरणंकर्तुंस्वस्ययत्नामधेयंकुरुइतिनामतदेवउपपदंपूर्वपदंय
स्यतत्प्रसिद्धंक्षेत्रंकुरुक्षेत्रमित्यर्थः व्यगाहंतजग्मुः ॥१॥ तत्रकुरुक्षेत्रेदेवस्तुतायाःहिरण्वत्याः नद्याःतीरवृक्षसंबंधिपुष्पाणांसुगंधैःमथितः
नाशितःपथिखेदःमार्गश्रमोयासांताःगजघटाः गजसमूहाःस्वयमपिकृतज्ञत्वेनैवतस्यैहिरण्वत्यैमदांभसांदानोदकानांलहरीभिःकृत्वाअतिश

अथोभयेतेकुरवोरणायस्वनामधेयोपपदंप्रसिद्धं॥ क्षेत्रंव्यगाहंतनिरुद्धपार्श्वाःशतांगमातंगतुरंगयोधैः॥१॥ हिरण्वत्यास्तत्र
त्रिदशविनुतायास्तटतरुप्रसूनानांगंधैर्मथितपथिखेदाःकरिघटाः॥ कृतज्ञत्वेनैवस्वयमपिमदांभोलहरिभिर्ददुस्तस्यैबह्वीर
तिसुरभिगंधीःप्रियसुरवीः॥२॥ अस्मज्जन्मभुवःसमानभिधयासप्तापिसिंधूनिमान्नेष्यामोवयमद्यशोषणमितिस्फीताभ्यसूया
इव॥ सेनासैंधवपंक्तयःखुरपुटैर्दीप्रक्षुरप्रोपमैर्भूमेरुल्लिखितात्स्थलादजनयन्भूयोरजोमंडलं॥३॥ येनसुरभिःसौगंध्यविशिष्टःगं

धोयासांताः बह्वीःप्रियसरवीःनदीनांनद्यएवसरव्योभवंतिताःददुः अनयादानोदकनदीप्रकटनोत्त्यामतंगजानांबाहुल्यंद्योत्यते॥२॥ सेनायाःसैं
धवपंक्तयःसिंधुदेशोद्भवाश्वसमूहाःवयंअस्माकंजन्मभुवःअभिधयानाम्नासमानान्सप्तापिसिंधून्समुद्रान्शोषणंनयामःइतिमनसिकृत्वास्फीताद्वृद्धिं
गताअभ्यसूयाईर्ष्यायेषांतथाभूताःसंतइवक्षुरप्रोपमैःअतितीक्ष्णक्षुरप्रबाणसदृशैःदीप्रैःखुरपुटैःउल्लिखितात्उत्खातात्भूमेःस्थलात्भूयःअति



१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शयेन बहुरजोमंडलं धूलिसमूहं अजनयत् लोकेहि अस्मज्जनकस्य यन्नाम न देवैस्तेषां अपि वर्णनं तेइदमसमीचीनमिति मत्सरः केषांचिदुत्पद्यते ॥ ३ ॥
तेषां कुरूणां कलहोदयात् प्राक् युद्धारंभात् प्राक् अशेषां आशां दिशां स्ववशे स्वाधीनतया विधातुं कर्तुं रथस्वनानां करिबृंहितानां हस्तिशब्दानां च
अन्योन्यं महीयान् अतिशयेन महान् कलहः आसीत् . सकलदिग्व्यापीनि रथध्वनिगजगर्जितानि बभूवुरित्यर्थः सकलदिक्स्थदेशान् स्वाधी

तेषांकुरूणांकलहोदयात्प्राग्रथस्वनानांकरिबृंहितानां ॥ आशामशेषांस्ववशेविधातुमन्योन्यमासीत्कलहोमहीयान् ॥ ४ ॥
नाम्नावानवमग्रहस्यसमतांसोढास्महेमीवयंतुंगत्वंनसहेमहीत्यतिरुषासन्नाहधुर्याइव ॥ उद्दंडाअपिकेतवोदद्दशिरेस्था
नंग्रहाणामतिक्रम्यस्यंदनवृंदमौलिकलितामध्येनभस्वत्सदं ॥ ५ ॥

नान् कर्तुं मुख्यकलहात् प्रागयं कलहो भूदित्युक्तिचातुर्यं ॥ ४ ॥ अ-
मीवयं नवमग्रहस्य नाम्ना केतुरिति नाम्ना समत्वं सोढास्महे सहिष्यामहे तुंगत्वं उच्चत्वं न सहेमहि न सहामहे इत्यर्थः इति मनसि आनीय सन्नाहे स
न्नद्धतायां धुर्याः धुरंधरा इव स्यंदनवृंदानां मौलिषु अग्रभागेषु स्थापिताः उद्दंडाः उन्नतदंडा उद्यतदंडाश्च केतवः ध्वजाः अपि मध्येनभस्वत्सदं आकाश
मध्ये ग्रहाणां स्थानं स्थितिप्रदेशं अतिक्रम्य स्थिताः दद्दशिरे दृष्टाः लोकैरिति शेषः अनयातिशयोक्त्या ध्वजानां अत्युच्चत्वं फलति ॥ ५ ॥ ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं·भा· महीपतीनां परमंदिराणि वरस्त्रगृहाणि शिरोभिः अग्रभागैः सुराणां मार्गं आकाशं लिलिहुः पस्पृशुः गगनमार्गं दध्रुरित्यर्थः गगनमार्गधृतौ हेतुमु टी·स्त·
२ त्प्रेक्षते वयं दूष्याणि दूष्यशब्दवाच्यानि दोषयुक्तानि च अतः शुची भवेम शुद्धानि भवाम इति मनस्यानीय अभ्रापगायाः आकाशगंगायाः वारिषु- ९
भिः मंक्षयेव मज्जनेच्छयेव अन्योपि दोषनिराकरणाय गंगास्नानार्थं गच्छति ॥ ६ ॥ ॥ गद्यं ॥ ततः क्षणादेव तत्कुरुक्षेत्रं कुरुनगरमित्रं हास्तिनास
दृशं बभूव कीदृशं कुरुक्षेत्रं विशालं यथा तथा विनिर्मितं यत् वीथीनां परमंडपपंक्तीनां सहस्त्रं तेन विराजमानं पुनः० विशंकटासु महतीषु वि

महीपतीनां परमंदिराणि मार्गं सुराणां लिलिहुः शिरोभिः ॥ वयं हि दूष्याणि शुची भवेम त्यभ्रापगा वारिभिः मंक्षयेव ॥ ६ ॥ ॥
गद्यं ॥ ततः क्षणादेव विशाल विनिर्मित वीथीसहस्त्र विराजमानं विशंकट विपणि विस्तारित विविध पण्याहरण विमर्द सहक्रयिकलो
कं विटकुलानुसार्यमाण विलासिनीजन निबिडित वेशवाटं विशिख कृपाण कुंत शक्ति प्रमुख विविधायुध संस्कार परवश योध सं
बाधं तत्कुरुक्षेत्रं कुरुनगरमित्रं बभूव ॥ १ ॥
पणिषु पण्यवीथिकासु विस्तारितानि यानि विविधपण्यानि नानाक्रेयधान्यादिवस्तूनि तेषां आहरणे
न क्रीत्वा ग्रहणेन यो विमर्दः परस्परांगसंघर्षः तं सहंते तथाभूताः क्रयिकलोकाः केतृलोकाः यस्मिन् तत् पु० विटकुलैः जारसमूहैः अनुसार्यमाणः अनुगम्य
मानः यः विलासिनीजनः जारिणीसमूहः तेन निबिडितः व्याप्तः वेशवाटः जारिणीगृहसमूहो यस्मिन् तत् पुनः विशिखादीनां नानायुधानां सं २
स्कारे शाणोल्लेखन स्निग्धद्रव्यलेपनादौ परवशाः तत्पराः ये योधाः तैः संबाधं निबिडितं ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रसेनानिवेशस्थानेदुःशासनाग्रजः दुर्योधनः हेभगवन् अस्मिन्नुपतस्थुषिसान्निध्यंप्राप्तेवीरभुजानांविनोदकालेकौशलदर्शनसमये त्वंवि
वाहविमुखोपिपितुरग्रेविवाहंनकरिष्यामीतिप्रतिज्ञानत्वात् विवाहपराङ्मुखोपिमदर्थं प्रत्यर्थिपार्थिवान् वैरिनृपान्विनिहंतुंपृतनाधि पत्यलक्ष्मीं
सैनाधिपत्यलक्ष्मींउपयमस्ववृणु सैनाधिपत्यंस्वीकुर्वित्यर्थः इतिविज्ञाप्यपितामहस्यभीष्मस्यचरणकमलयोः प्रणिपपात साष्टांगंप्रणनाम॥

तत्रदुःशासनाग्रजोभगवन्नस्मिन्नुपतस्थुषिवीरभुजविनोदकालेत्वंविवाहविमुखोपिमदर्थंप्रत्यर्थिपार्थिवान्विनिहंतुंपृतना
धिपत्यलक्ष्मीमुपयमस्वेतिविज्ञाप्यपितामहस्यचरणनलिनयोःप्रणिपपात॥२॥ ॥पद्यं॥ दुर्योधनेविशतिमौलिभुवा
पदंस्वंशूराग्रणीष्वचरमःसुरसिंधुसूनुः॥ अर्धक्षणाद्रिपुभटांस्त्रिदिवेविधास्यन्नध्यक्षतापदमविक्षदनीकिनीनां॥७॥

॥२॥ पद्यं॥ शूराग्रणीषुशूरश्रेष्ठेषु अचरमः प्रथमः सुरसिंधुसूनुः
भीष्मः दुर्योधनेमौलौशिरसिभुवाविद्यमानेनकिरीटेन यद्वामौलेः किरीटस्यभुवास्थितिदेशेनशिरसास्वपदंविशतिसतिशिरसापदस्पर्शेन
नतिंकुर्वतिसतीत्यर्थः रिपुभटान् अर्धक्षणात् त्रिदिवेस्वर्गेविधास्यन्करिष्यन् अनीकिनीनांसेनानांअध्यक्षतापदंआधिपत्यपदंअविक्षत् प्रवि
वेशसेनापतित्वंस्वीचकारेत्यर्थः दुर्योधनेस्वपदंविशतिसोप्यन्यपदमविक्षदित्युक्तिचातुर्यं॥७॥ ५ ६ ७ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेपार्थास्त्वद्रुपदनंदनंधृष्टद्युम्नंसेनान्यंसेनापतिंआशुचक्रुः कीदृशंद्रुपदनंदनंयःउद्धतानांबलिनांविरोधिनांवनानिदग्धुंनिजजन्मकालेअ ग्निकुंडादुत्पत्तिकालेसक्तंसंलग्नंसततंज्वलंतंवन्हिंप्रतापकपटान्भुजेवहति सततामतिवहनक्रियाविशेषणंवा वनदहनेज्वलद्वन्हिःप्रभ वतीतिप्रतापेप्रनापत्वंनिन्हुत्यज्वलद्वन्हित्वारोपः ॥८॥ गद्यं ॥अथसदसिभूरिसमाजेमहारथानांपरिगणनकथायांअस्मत्सेनायांकतिमहा रथानिरथार्धरथाःसंतीतिपरिगणनप्रस्तावे अयंकर्णःअर्धरथः इत्युक्त्यानिन्हुतंपौरुषंयस्यतस्यभावस्तत्तानयारोषेणचिन्हितंवदनरोचिःवदनकां

पार्थास्त्वतेद्रुपदनंदनमाशुचक्रुःसेनान्यमुद्धतविरोधिवनानिदग्धुं ॥ वन्हिंप्रतापकपटान्निजजन्मकालेसक्तंभुजेवहतियःस्सततं ज्वलंतं ॥८॥ ग॰ अथसदसिमहारथपरिगणनकथायामर्धरथोयमितिजान्हवेयेननिन्हुतपौरुषतयारोषचिन्हितवदनरोचिरन्हां पतिकुमारोन्हाययुधितस्यावधिमेवनिजहेतेरसाधारणस्यापिसाधारणंप्रतिजज्ञेइदंप्रतिपद्यास्विद्यमानंमानधनंस्त्वयोधनंवत्ससमा भैषीर्महाभुजानपिरिपुमहीभुजःसंरव्येरवरतरविशिखवसुरेवनरवादिष्यामीतिपितामहःप्रसादयामास ॥३॥ तिर्यस्यसःअहःपति सूनुः कर्णःतस्यभीष्मस्यअवधिंमरणतुल्यदशयासैनापत्यसमाप्तिंअसाधारणस्यापिहेतेःकालपृष्ठधनुःशस्त्रस्यसाधारणंययातयाप्रतिजज्ञे प्र तिज्ञांचक्रे अयंभावः देवप्रसादलब्धकालपृष्ठनामकधनुषइतरधनुर्भिरसाधारण्यं यदायंभीष्मोनिःसत्वोभूत्वासैनापत्यंत्यजेत् तदैवाहंयुधिकरेधनु र्ग्रहीष्यामीतिप्रतिजज्ञे अतःतच्छस्त्रत्यागकालएवस्वशस्त्रग्रहणकालः इत्यवधिशस्त्रयोःसाधारण्यमिति इदंप्रतिपद्यज्ञात्वास्विद्यमानंमानधनंसुयो ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनंप्रतिहेवत्समाभैषीः बलिनः क्षत्रियानपिसंख्येयुद्धेखरतराः तीक्ष्णतराः येविशिखाः तदेवसुखंतेनखादिष्यामिइत्युक्त्याभीष्मःप्रसादयामाससं
तोषयामास ॥ ३॥ ततनंतरं ॥ पद्यं ॥ ॥ धृतकार्मुकाभ्यांअभ्रापगातनयपार्षतनंदनाभ्यांगंगापुत्रद्रुपदपुत्राभ्यांअग्रावनीसेनाग्रभूमिःतिलकिता
संजाततिलकेवभूषिता उभयेपिद्वयेपिकुरुवीराःउच्चावचंउच्चनीचंबिरुदंमुकुटावतंसछत्रचामरादिकंपराक्रमसूचकराजलब्धपदार्थंवहंतः

तदनंतरं ॥ पद्यं ॥ अभ्रापगातनयपार्षतनंदनाभ्यामग्रावनीतिलकिताधृतकार्मुकाभ्यां ॥ उच्चावचंनिजनिजंबिरुदंवहंतोयुद्धायतस्थु
रुभयेपिकुरुप्रवीराः ॥ ९॥ जेतापुराभिवतदाजलजातयोनिंपत्रीश्वराग्रजमिवप्रथमोग्रहाणां ॥ अग्रेनिधाययदुनायकमात्ततोत्रंपार्थो
रथीप्रधनभूमिमवापवीरः ॥ १०॥ संचिंत्यभीष्ममुखबंधुजनस्यहानिंसंतापिनःसमरसीमनिशक्रसूनोः ॥ बाष्पांबुचक्षुरधिकंश्वसितं
मुखेंदुर्धैर्यंमनःकरतलंचमुमोचचापं ॥ ११॥

धारयंतःसंतःयुद्धाययुद्धंकर्तुंतस्थुः ॥ ९॥ तदायुद्धप्रारंभेवीरःरथीपार्थःअर्जुनःपुरांजेतारुद्रःजलजातयोनिंब्रह्माणमिवग्रहाणांप्रथमःसूर्यःप-
त्रीश्वराग्रजमिवगरुडाग्रजमिवआत्ततोत्रंअश्वताडनार्थंगृहीतकशंयदुनायकंअग्रेरथाग्रेसूतस्थानेविधायप्रधनभूमिंरणभूमिंअवाप ॥ १०॥ सम
रसीमनिभीष्ममुखबंधुजनस्यहानिंमृत्युंसंचिंत्यसंतापिनःपश्चात्तापयुतस्यशक्रसूनोःचक्षुःदुःखात्बाष्पांबुमुमोच तथामुखेंदुःअधिकं-
श्वासंमुमोच मनश्चधैर्यंमुमोच करतलंचापंमुमोच तत्याज ॥ ११॥

वसुदेवसूनुः बलारिसूनुं अर्जुनं तैस्तैः गीतात्मकैः वचोभिः चिरेण आश्वास्य ज्ञानोपदेशेन संतापं दूरी कृत्वेत्यर्थः तत्र युद्धप्रसंगे पावकस्य जाठ
राग्नेः क्षुद्विकारस्य असासहिं भृशमसहनकर्त्तारं खांडववनदाहे पावकस्य क्षुधाशामकमित्यर्थः शरासं चापं पुनः अग्राहयत् ग्राहयामास युद्धे
प्रवर्त्तयामासेत्यर्थः धनुश्चापौ धन्व शरासनकोदंडकार्मुकं इष्वासोपीत्यमरात् शरासशब्दस्य पुंस्त्वं ॥१२॥ दूरदीर्घो अतिदीर्घो देवव्र

बलारिसूनुं वसुदेवसूनुर्वचोभिराश्वास्य चिरेण तैस्तैः॥ असासहिं पावकजाठराग्नेरग्राहयत्तत्र पुनः शरासं ॥१२॥ दे
वव्रतस्य जयकेतनचिन्हतालश्यामप्रभावलिरदृश्यत दूरदीर्घा ॥ सरव्याः सुतस्य समरे भुजवीर्यलक्ष्मीं संवीक्षितुं रवि
सुतेव नभो धिरूढा ॥ १३॥ छ छ छ छ

तस्य भीष्मस्य जयकृत् यः केतने ध्वजे चिन्हं तालः अयं भीष्मरथ इति
ज्ञापकस्तालवृक्षः तस्य श्यामायाः प्रभावलिः कांतिपरंपरा अदृश्यत दृष्टा लोकैरितिशेषः तामुत्प्रेक्षते समरे सरव्याः भागीरथ्याः सुतस्य भी
ष्मस्य भुजवीर्यलक्ष्मीं संवीक्षितुं नभोधिरूढा उच्चदेशं नभस्थलं अधिरूढा रविसुतेव यमुनेव ॥१३॥ छ छ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदायुद्धारंभेभटानांअर्भटीसिंहनादादिलीलातस्याःपिशुनतांसूचकतांउद्दामयंतःप्रकाशयंतःनिर्धूतानिदूरीकृतानिअंतर्हितीकृतानीनियावत् श
ब्दांतराणियैस्तेनिःसाणादिभाभांभेरीपटहादीनांजैत्रवाद्यानांजिगीषुराजवाद्यानांनिनदाःशब्दाःअतिदूरयापदव्यामार्गेणसंपादितांप्रापितांश्रां
तिंश्रमंक्षेप्तुमिवनाशयितुमिवधाराधरैःवर्षुकमेघैःव्यासाःसरूअंबुधेःवेलाशैलानांतीरस्थमर्यादापर्वतानांमहागुहासुविविशुः युद्धारंभेयेभेरीप

युद्धारंभभटार्भटीपिशुनतामुद्दामयंतस्तदानिःसाणादिमजैत्रवाद्यनिनदानिर्धूतशब्दांतराः॥ श्रांतिंक्षेप्तुमिवातिदूरपदवीसं
पादितामंबुधेर्वेलाशैलमहागुहासुविविशुर्व्यासारूधाराधरैः॥ १४॥ संग्रामदुंदुभिरवश्रवणेनदेवाःसर्वेकपाटघटितानिगृ
हाणिकृत्वा ॥आदायनंदनवनादभिषेक्तुमाजौवीरान्प्रसूनचयमप्यभजन्विहायः ॥१५॥

टहादिशब्दाजातास्तेसमुद्रपर्य
तंदूरंगताइत्यर्थः अन्योपिदूरमार्गगमनेनजातश्रमपरिहारायशीतलस्थलमाश्रयति ॥१४॥ सशब्दःस्वर्गगतइत्याह संग्रामेति सर्वेदेवाअ
पिसंग्रामस्थदुंदुभिरवाणांश्रवणेनगृहाणिकपाटैःघटितानिपिहितानिकृत्वाआजौसंग्रामेवीरान्कृतपराक्रमशूरान् अभिषेक्तुंवर्षितुंनंदनवना
त्प्रसूनचयंकुसुमसमूहंआदायविहायः आकाशंअभजन् देवाअपियुद्धचमत्कारंद्रष्टुंपुष्पाणिवर्षितुंचाकाशमारूढाइत्यर्थः ॥१५॥ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र·भा·
५

टी·स·
१

मघवत्प्रमुखाः इंद्रादयोदेवाः मिथः परस्परंविमर्दात् अंगसंगात् घर्मजलेसतिसकलंतत् घर्मजलं अंगकेभ्यः व्यपनेतुंनाशयितुंस्वयंमरुतोपिवा
यवः संतोपिआतत्तालवृंताः वायूत्पादनार्थंगृहीतव्यजनाः बभूवुः इदमाश्चर्यं मरुतोदेवा इत्यर्थांतरं ॥१६॥ तत्ररणांगणेसायुधौससिंहना
दौरिपुगणौउभयसैनिकसमुदायौपुष्करेआकाशेपूर्वपश्चिममरुद्भ्यांपूर्वपश्चिमझंझावाताभ्यांप्रचोदितौउन्नौनवौयौघनाघनौवर्षुकमेघौ
ताविवशनैःशनैःमंदगमनेनसंगतौमिलितौ ॥१७॥ सामान्येनयुद्धविशेषंविवक्षुस्तावदादौगजयुद्धंनवभिराह धावदिति धावतांस्यंदना

सतिघर्मजलेमिथोविमर्दात्सकलंतद्व्यपनेतुमंगकेभ्यः॥ मघवत्प्रमुखाःसुराबभूवुर्मरुतोपिस्वयमात्ततालवृंताः॥१६॥तत्र
तौरिपुगणौशनैःशनैःसंगतौसधनुषौसगर्जितौ॥पूर्वपश्चिममरुत्प्रचोदितौपुष्करेनवघनाघनाविव॥१७॥धावत्स्यंदनकेत
नांशुकमरुद्व्याधूतमंदाकिनीविंदूनामपिसैन्यकुंजरघटाशुंडासमुत्थायिनां॥दानांभःपृषतामपिस्फुटशरत्ताराकृतिस्पर्धि
नांभिदंग्राहयितुंशशाकगगनेभृंगानुरोधक्रमः॥१८॥

नांयानिकेतनांशुकानिध्वजवस्त्राणितेषांमरुद्भिः वायुभिःव्याधूतायाः कंपिता
याः मंदाकिन्याःस्वर्गंगायाःविंदूनामपिसैन्यकुंजरघटानांसैन्यगजसमूहानांशुंडाभिःगंडादिनिकटेशुंडाफूत्कारैःसमुत्थायिनांऊर्ध्वगामिनांदाना
भः पृषतामपिमदोदकविंदूनामपि द्वावपिशब्दौपरस्परसमुच्चायकौ भेदंग्राहयितुंज्ञापयितुंगगनेभृंगाणांअनुरोधक्रमःसुगंधलोभेनानुगमन ५
स्वभावःशशाकसमर्थोबभूव येषांविंदूनांभृंगानुगमनंवर्ततेतेमदविंदवः येषांतन्नास्तितेमंदाकिनीविंदवइतिज्ञातमित्यर्थः कथंभूतानांद्विविध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बिंदूनां स्फुटाः स्पष्टाः याः शरत्ताराकृतयः शरत्कालिकनक्षत्राकाराः तान् स्पर्धंते तेन तथाभूतानां वर्तुलत्वेन शुभ्रत्वेन नक्षत्रसदृशानामित्यर्थः तत्रदा नांभसः श्यामत्वात् तस्य शुंडाशीकरमिश्रीभावेन शुभ्रत्वं विवक्षितमिति ज्ञेयं ॥१८॥ आहवे युद्धे द्विपं गजं आसाद्य प्राप्य रदपथेन दंतमार्गेण आरुह्य तीक्ष्णेन असिना खड्गेन यंतारं हस्तिपकं निपात्य हत्वा साट्टहसितं सशब्दहास्येन सहितं यथा तथा स्कंधे गजस्कंधे स्थितिं विधाय कलाकुंभयोः आस्फालनकारिणं गजचांचल्यनिवारणाय करेण आस्फालनकर्तारं रिपुभटं दृष्ट्वा कस्याश्चित् द्विवौकसस्त्रियाः स्वर्वेश्यायाः कठिनयोः कुचकुंभयोः अखं-

आसाद्य द्विपमाहवे रदपथेनारुह्य तीक्ष्णासिना यंतारं विनिपात्य साट्टहसितं स्कंधे विधाय स्थितिं ॥ कुंभास्फालनकारिणं रिपुभटं दृष्ट्वा दिवौकस्त्रियाः कस्याश्चित् कुचकुंभयोः कठिनयोः कंडूरखंडाभवत् ॥१९॥ कश्चिद्गजः प्रतिभटेन करे विलूनेऽप्यामूलभागमसिनानमिताग्रकायः ॥ क्षिप्रं प्रगृह्य रदनेन निषादिहस्तात्स्रस्तां सृणिं पुनरदात्कुशलाय तस्मै ॥२०॥

डा निरंतरा कंडूः अभवत्

गजकुंभास्फालनकर्तारं तत्तादृशं वीरं दृष्ट्वायं स्वर्गगामी भवेच्चेन तर्ह्येनं वृत्वा तद्धस्तेनाहं कुचकुंभास्फालनं कारयिष्यामीत्युत्कंठासमुत्पन्नेति भावः ॥१९॥ कश्चिद्गजः प्रतिभटेन शत्रुवीरेण असिना आमूलभागं मूलभागपर्यंतं यथा तथा करे शुंडादंडे विलूने छिन्ने सत्यपि नमितः नम्रीकृतः अग्रकायः शरीरस्य पूर्वभागो येन तथाभूतः सन् निषादिनः हस्तिपकस्य हस्तात् स्रस्तां गलितां सृणिं अंकुशं रदनेन क्षिप्रं शीघ्रं प्रगृह्य कुशलाय-कल्याणार्थं तस्मै निषादिने पुनः अदात् दत्तवान् स्वमरणसमयेपि मत्पोषकस्य विजयो भवत्विति पशोरपि बुद्धिरभवत् किं पुनस्तत्रत्यमनुष्याणामिति भावः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भसितस्यभस्मनः लेपेनसितौशुभ्रौयुधिसुखेपरस्परं दत्तरदौ अन्योन्यप्रहारार्थं आरोपितदंतौउभौकरिणौ अवेक्ष्यहरिः इंद्रः वाहनेऐरावतगजेवह
त्यपिस्वस्यवहनंकुर्वत्यपितस्मिन्सकलाः सहस्रसंख्याकाः दृशः सरभसंससंभ्रमंनिदधेस्थापयामास शुभ्रत्वेनचतुर्दंतत्वेनचममगजोयुद्धे
गतः किमितिशंकयासंभ्रमेणस्वगजंसहस्रदृग्भिरपश्यदितिभावः ॥२१॥ प्रतिदंतिनः युद्धार्थमागतस्यशत्रुगजस्य घातात् प्रहारात् भग्नः

भसितलेपसितौकरिणावुभौयुधिपरस्परदत्तरदौसुखे ॥ हरिरवेक्ष्यवहत्यपिवाहनेसरभसंनिदधेसकलादृशः ॥२१॥ भ
ग्नैकदंतमुसलः प्रतिदंतिघातात्कुंभाग्रलक्ष्यकुटिलांकुशचंद्रलेखः ॥ कश्चिद्गिरीशसमतांकलयन्करींद्रः सारूप्यभागिव
गणाधिपतेर्विरेजे ॥२२॥ ७ ७ ७ ७ ७ ॥

एकः दंतमुसलोयस्यसः कुंभाग्रेगंडोपरिभागेलक्ष्यादृश्याकुटिलांकुशएवचंद्रलेखायस्यसः कश्चित्करींद्रः गिरीशसमतांशिवसादृश्यं
कलयन् स्वीकुर्वन् सन् गणाधिपतेः श्रीगजाननस्य सारूप्यभागिव एकदंतत्वेनभालचंद्रत्वेनचसरूपतांप्राप्तइवविरेजेशुशुभे इदमाश्चर्यं
गिरीशसमतां स्थूलत्वेनमहापर्वतसाम्यमित्यर्थांतरेण परिहारः ॥२२॥ ७ ७ ७ ७ ७ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कश्चित्करिणः कलभः शावकः वेगेननिर्गत्यअग्नतोगत्वाअरिनृपतिंबलेशत्रुराजसैन्येस्वंस्वकीयंस्वामिनंस्वोपरिस्थितंप्रभुंपातयन्तत्रशत्रुसैन्येस्कंधेअधिरूढंकृताधिरोहणंविमतमपिशत्रुनिषादिनमपिस्वसैन्यंनीत्वा तथास्वप्रभुवत्अधत्तदधार इत्थंयुधिदुःसाध्यः रोधोनिरोधोयस्यसः दूरंअत्यंतंधूतः अगणितः अंकुशोयेन तथाभूतः सन्विज्ञंमन्यंआत्मानंनिषादिकर्मणिकुशलमानिनिषादिद्वयमपिजनानांहासपात्रंउपहास्यास्पदंविदधे अयंदुर्दांतस्यगजस्यस्वभावः ॥२३॥ द्वौवारणौगजौहस्तेनहस्तंशुंडयाशुंडांअभिहत्यइतिक्रियायाः उत्तरत्रापिसंबंधः दंतयुगेनदंतौक

कश्चिन्निर्गत्यवेगादरिनृपतिबलेपातयन्स्वामिनंस्वंनत्रस्कंधाधिरूढंविमतमपितथाधत्तनीत्वास्वसैन्यं ॥ इत्थंदुःसाध्यरोधोयुधिकरिकलभोदूरधूतांकुशःसन्विज्ञंमन्यंनिषादिद्वयमपिविदधेहासपात्रंजनानां ॥२३॥ हस्तेनहस्तमथदंतयुगेनदंतौकर्णौच कर्णयुगलेनपदेचपद्भ्यां ॥ वालेनवालमभिहत्यचवारणौद्वौतुल्यांगयुद्धमतिशिक्षितमादधाते ॥२४॥ निषादिनोदंतिशिरस्यधोमुखंनिपातितांगाल्लगुडस्यताडनैः ॥ व्यथापनोदायमदस्यसौरभंविनम्यजिघ्रंतइवालुलोकिरे ॥२५॥

र्णयुगेनकर्णौपद्भ्यांपदेपादौवालेन वालंपुछेनपुछंचअभिहत्यअतिशयेनशिक्षितंअभ्यस्तंतुल्याभ्यांअंगाभ्यांअवयवाभ्यांयुद्धंआदधाते कुर्वाते २४ लगुडस्ययष्टेः ताडनैः कर्तृभिः दंतिशिरसिगजमस्तकेअधोमुखंयथातथानिपातितांगाः पातितदेहाःनिषादिनः व्यथायाः यष्टिप्रहारव्यथायाः अपनोदनायविनम्यनम्रीभूयमदस्यसौरभंसौगंध्यंजिघ्रंतइवआघ्राणंकुर्वंतइवआलुलोकिरेविलोकिताः ॥२५॥ छ छ छ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीक्ष्णैः प्रत्यर्थिभल्लैः शत्रुबाणैः अपहृतशिरसां छिन्नमस्तकानां हस्तिपानां निषादिनां शरीरात् उत्क्रांताः बहिरूर्ध्वे देशे निष्क्रांताः करिमदपय
सां गजदानोदकानां सौरभीं सौगंध्यं उद्वहंतः धारयंतः प्राणवाताः दिवि आकाशे संमर्दभाजां परस्परांगसंघर्षवतीनां स्फुरत्स्फुरद्दृशां देवांगनानां
कपोलस्थलकुचकलशयोः स्वेदवारिणां घर्मोदकानां प्रवाहं पायंपायं पीत्वा पीत्वा पुनः पुनः शोषयित्वेत्यर्थः तालवृंतस्य व्यजनस्य कृत्यं वायु-



तीक्ष्णैः प्रत्यर्थिभल्लैरपहृतशिरसां हस्तिपानां शरीरादुत्क्रांताः प्राणवाताः करिमदपयसां सौरभीमुद्वहंतः ॥ पायंपायं कपोल
स्थलकुचकलशस्वेदवारिप्रवाहं चक्रुः संमर्दभाजां दिवि स्फुरत्स्फुरद्दृशां तालवृंतस्य कृत्यं ॥ २६ ॥ अश्वावुभौ तस्य तुरग्रपादा
वुत्क्षिप्य युद्धाभिमुखी भवंतौ ॥ परस्परस्योपरि हेतिपातात्स्वसादिनौ त्रातुमिवोर्ध्वकायौ ॥ २७ ॥ ७ ७

सुखसाध्यघर्मशोषणकृतिरूपं कर्तव्यं चक्रुः अनयातिशयोक्त्या भटैः असंख्याता निषादिनो हता इति व्यज्यते २६ अथ चतुर्भिरश्वयुद्धमाह अश्वाविति युद्धा
भिमुखीभवंतौ युद्धार्थमभिमुखौ भवंतौ उभौ अश्वौ परस्परस्य उपरि हेतिपातात् परस्परकृतशस्त्रपातात् स्वसादिनौ स्वस्मिन् आरोहणकर्तारौ भटौ त्रातुमिव अग्र ७
पादौ उत्क्षिप्य ऊर्ध्वंगतः कायः पूर्वकायो ययोस्तथाभूतौ संतौ तस्थतुः अन्योपि शत्रुकृतशस्त्रप्रहारात् स्वस्वामिनं त्रातुं मध्ये स्वशरीरं करोति ॥ २७ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैरिभटस्ययः खड्गवरः तस्यएकैवधारापंचकधाराकसतीष्वपिअश्वेविद्यमानास्वपिकंचित् अश्वंस्कंधेविभिद्यछित्वाइतरैःदुरापान् अलभ्यान् तस्यअ
श्वस्यअसून् प्राणान्जग्राह अल्पमपिसूक्ष्ममपितस्यअश्वस्यक्षतजांबुनः रक्तोदकस्यलेशंनजग्राह समयेपंचधाराअपिअनुपयुक्ताजाताइतिभावःपं
चधाराश्रुतमप्यश्वंविभिद्यगताधाराल्पमप्यंबुलेशंनजग्राहेत्याश्चर्यं खड्गधारायाअतितीक्ष्णतयाछिदिक्रियांकृत्वारक्तोत्पत्तेः प्राक् अतिशीघ्रंबहिर्निर्गम
नाद्रक्तांबुलेशस्वीकाराभावइतिभावः आस्कंदितंधौरितकंरेचितंवल्गितंप्लुतं गतयोमूःपंचधाराअश्वस्य इच्छयासमागतिः पूर्वतोधिकाचतुरागतिः

एकैववैरिभटखड्गवरस्यधाराधाराकपंचकसतीष्वपिकंचिदश्वं ॥ स्कंधेविभिद्यनदसूनितरैर्दुरापान्जग्राहनाल्पमपितत्क्षत
जांबुलेशं ॥२८॥ समरभुविबभासेसादिनोभूषणानांमरकतमणिभासांमध्यगःकश्चिदश्वः ॥ सकलभटविमर्दैश्चंचलाद्दिं
बभेदेनिपतितइवरथ्योनेतुरन्हांशतांगात् ॥२९॥

मंडलिकयागतिः वेगेनगतिः त्वरयाकंपेनगतिः इतिक्रमेणपंचानांधाराणामर्थाः ॥२८॥ समरभुविसादिनःअश्वारोहस्यभूषणानांभूषासंबंधिनांमर
कतमणीनांहरितरत्नानांयाः भासः हरित्कांतयः तासांमध्यगःमध्यस्थः कश्चित् अश्वः अन्हांनेतुः सूर्यस्यबिंबभेदेविषयेसकलभटानामभिमुखहत
सकलयोधानांविमर्दैः प्रवेशेअहंपूर्विकयासंमर्दैः चंचलात् शतांगात् रथात् निपतितः रथ्यश्वः सूर्यरथाश्वइवबभासेशुशुभे सूर्याश्वानांहरितत्वा
दियमुत्प्रेक्षा ॥२९॥

आयोधनांगणजुषां युद्धांगणस्थितानां असृगापगानां रक्तनदीनां आवर्तगर्भे जलभ्रममध्ये पतिताः हयानां कुणपाः शवाः मंडलचंक्रमेषु मंडलाकारगति
षु पूर्वं विहितः कृतः विहितपूर्वः तं शिक्षाविशेषं अभ्यासविशेषं आददाना इव स्वीकुर्वाणा इव संबभ्रमुः अनेन चतुरंगसेनावधबाहुल्यं द्योत्यते ॥३०॥ अ
थैकेन पदानि द्वंद्वयुद्धमाह धन्वीति अथ स्वस्य स्वस्य चारुस्त्राणां प्रयोगे दृढपरिचितयः दृढाभ्यासाः द्वंद्वयोधेषु अग्रगण्याः मुख्याः धन्वी धनुर्धारी ध-



आयोधनांगणजुषामसृगापगानामावर्तगर्भपतिताः कुणपा हयानां ॥ संबभ्रमुर्विहितपूर्वमुपाददानाः शिक्षाविशेषमिव मंडल
चंक्रमेषु ॥३०॥ धन्वी धानुष्कमारादसिभृन्तमसिमान् कुंतिनं कुंतधारी चक्रास्त्रं चक्रहेतिर्गदिनमपि गदापाणिरन्योन्यमेत्य ॥
स्वस्वास्त्राणां प्रयोगे दृढपरिचितयो हंतृवध्यत्वशैली साधारण्ये प्रतिष्ठामथ विदधुरमी द्वंद्वयोधाग्रगण्याः ॥ ३१ ॥ ततः ॥ धृ
ष्टद्युम्नोत्कृत्तवर्माणमग्रे दृष्ट्वा हाहाशब्ददीनां स्वसेनां ॥ कोदंडज्यामास्पृशन्घोरघोषां कोपाद्भीष्मः प्राविशत्पार्थसैन्यं ॥ ३२ ॥

नुः प्रहरणं यस्य तं धानुष्कं एत्य इति क्रियाया अत्रोत्तरत्रापि संबंधः चक्रहेतिः चक्रायुधः इति अन्योन्यं स्वस्व मानशालिनं परस्परं एत्य अभिगम्य हंतृत्व
वध्यत्वयोः शैल्याः अर्हतायाः साधारण्ये समानभावे प्रतिष्ठां स्थितिं दधुः तस्मिन् द्वंद्वयुद्धे अयमिमं हन्यादिति निश्चयो न बभूवेति भावः ॥३१॥ ततः धृष्टद्यु
म्नेन पांडवसेनापतिना कृत्तानि छिन्नानि वर्माणि कवचानि यस्याः तां अत एव हाहाशब्दैः दीनां स्वसेनां अग्रे दृष्ट्वा भीष्मः घोरघोषां कोदंडज्यां धनुर्मौर्वीं आस्पृशन् बाणसंधा
नार्थं आस्फालयन् पार्थसेनां प्राविशत् ॥ ३२ ॥ ७ 

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिंहनादेनक्ष्वेडाशब्देनसहितेसरितःगंगायाः कुमारेभीष्मेचापंसमाकृष्यविमुक्तैःशरैः परान्शत्रून् परेतुंप्रेतान्कर्तुंहंतुमित्यर्थः प्रथमंप्रवृत्तेसतिअ
प्सरोभिः वरान्वरीतुंववलेसज्जीबभूवे अत्रपरीतुमितिपाठस्तुनसम्यक् अभिमुखंहतानांस्वर्गगामित्वात्तद्वरणस्पृहयाप्सरोभिर्ववलेइतिभावः
॥३३॥ तस्यभीष्मस्यपृषत्कवर्याः बाणश्रेष्ठाः पांडवानांसेनामध्येपृथक्पृथक्सहस्रंद्विपान्गजान्पतितान्मृत्वापतितान्अकार्षुः एवंतुरगान्भ

ससिंहनादेसरितःकुमारेचापंसमाकृष्यशरैर्विमुक्तैः॥ परान्परेतुंप्रथमंप्रवृत्तेवरान्वरीतुंववलेप्सरोभिः॥३३॥ पृथास्त
नानांपृतनांतरालेपृथक्पृथक्तस्यपृषत्कवर्याः॥द्विपान्सहस्रंतुरगान्सहस्रंभटान्सहस्रंपतितानकार्षुः॥३४॥सिंधोःस्त
तस्यविशिखैर्जमदग्निसूनोःप्राणान्विलिह्यधिगितिप्रविमुक्तवद्भिः॥कृत्तान्यमुंचनविरोधिकुलानिकश्चित्कश्चिज्जवेनजगृहे
युधिभूतवर्गः॥३५॥

टांश्चअकार्षुः३४ जमदग्निसूनोःपरशुरामस्यप्राणान्विलिह्यआस्वाद्यधिगित्युक्त्वाप्रविमुक्तवद्भिःत्यजद्भिःएतत्प्राणापहरणेब्र
ह्महत्याप्राप्स्येतत्कर्मनिंद्यमितिमत्वात्यजद्भिरितिभावः सिंधोः नद्याःसुतस्यभीष्मस्यविशिखैःयुधि कृत्तानिछिन्नानिविरोधिकुलानिशत्रुवृंदानिकश्चित्भूतानांवर्गः
समूहःनजगृहेकश्चित्भूतवर्गःजगृहे इदंविचित्रं तत्रपंचमहाभूतांतर्गतप्राणवाय्वादिसमूहःनजगृहेतत्राजपिशाचानांवर्गोभक्षितुंजगृहेस्वीचकारेत्यर्थात्परिहारः३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दलितवैरिणिहतशत्रौदेवव्रतेभीष्मेदृष्टमात्रे दृष्टेएवसारथ्यमात्रकरणे अर्जुनस्यसारथिकर्ममात्रकरणेकृतसंगरोपिकृतप्रतिज्ञोपिमुरजित्श्रीकृष्णः रथ
स्यमूलेकेवलंचक्रंनभ्रमयांचकाररथस्यमध्येपिचक्रंभ्रमयांचकार यदाभीष्मप्रतापस्यपुरोर्जुनसामर्थ्यंनचलतिस्मतदाकृष्णःसारथ्यकर्मणाकेव

देवव्रतेदलितवैरिणिदृष्टमात्रेसारथ्यमात्रकरणेकृतसंगरोपि ॥ मूलेनकेवलमहोमुरजिद्रथस्यमध्येपिचक्रमतिविभ्रमयां
चकार ॥ ३६ ॥ अरिमंडलखंडकैःपृषत्कैरवदीर्णारुधिरापगावलीनां ॥ अवनीपतयोरुषानिजानामधिविन्नांजननीमसु
ष्यन्चक्रुः ॥ ३७ ॥

लंरथंनगमयामासअपितुभीष्मवधार्थंरथमध्येहस्तेचक्रंधृत्वाभ्रामयामासेत्यर्थः ॥ ३६ ॥ अरिमंडलानांखंडकैःछेत्तृभिःपृषत्कैःबाणैःअवदीर्णाः
छिन्नाः अवनीपतयःराजानःरुषाक्रोधेनअसुष्यन्भीष्मस्यजननींभागीरथींनिजानांरुधिरापगावलीनांरक्तनदीपरंपराणांअधिविन्नांसपत्नींचक्रुः अन्यो ९
पिवैरीस्वशत्रुमपकर्तुमशक्तस्तन्मातुरप्रियंकरोति स्त्रीणांसपत्नीदुःखंप्रसिद्धं ॥ ३७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰ तदनु कल्पांतरुद्रस्य बंधुः संहारकारित्वेन तत्तुल्यः स्फुरसिंधुसूनुः भीष्मः अयुतेन राज्ञां शिरोभिः दशसहस्रसंख्याकैः क्षत्रियाणां मस्तकैः वसुंधरां पृथ्वीं बंधुरयांचक्रे नतोन्नतांचक्रे कथंभूतैः शिरोभिः समरे संमुखीनाः युद्धार्थमभिमुखाः ये वैरिभटाः तेषां प्राणानां परिमोषणे अपहारविषये उन्मुखानां उत्सुकानां शिलीमुखानां बाणानां प्रस्थानसमयस्य मतं समाप्रच्छनं संप्रश्नः तस्य पात्रीकृताः कर्णपुटाः यैः तैः येषां कर्णपुटपर्यंतं ज्यामाकृष्य परप्राणहरणार्थं बाणाः प्रमुक्तास्तैरित्यर्थः पुनः॰ बलवैरिनगरे अमरावत्यां वास्तव्या वासकर्त्री या वारवनिताजनता अप्सरसां संहतिः तस्याः पाणिपंकेरुहेभ्यः करकमलेभ्यः

ग॰ तदनु समरसंमुखीनवैरिभटप्राणपरिमोषणोन्मुखशिलीमुखप्रस्थानसमयसमाप्रच्छनपात्रीकृतकर्णपुटैर्बलवैरिनगरवास्तव्यवारवनिताजनतापाणिपंकेरुहपरिगलितपारिजातप्रसवसहपतितचंचरीकपुंजमंजुगुंजितव्यंजितभेदचिकुरबंधैर्वेगापतितविशिखविघट्टनविपर्यस्तविकटमुकुटविटंकविप्रकीर्णमुक्ताफलशंकावदान्यरणश्रमवारिशीकरनिकरकोरकितनिटिलभागैरोषातिरेकव्यनिकरिनदशनालिदंशनपुनरुक्तरक्तिमाधरैरयुतेन राज्ञां शिरोभिः कल्पांतरुद्रबंधुः स्फुरसिंधुसूनुर्वसुंधरां बंधुरयांचक्रे ॥ ५ ॥

परिगलितानि यानि पारिजातप्रसूनानि कल्पवृक्षपुष्पाणि तैः सह पतिताः ये चंचरीकपुंजाः भ्रमरसमूहाः तेषां मंजुगुंजितैः व्यंजितः प्रकटीकृतः भेदो येषां ते चिकुरबंधाः केशबंधाः येषां तैः पराक्रमिणामभिमुखहतानां संबंधित्वाद्दिवीकृतपुष्पवृष्टिविशिष्टैरित्यर्थः ॥ पु॰ ॥ वेगेन आपतितानां विशिखानां विघट्टनैः ताडनैः विपर्यस्ताः विपरीतं पतिताः ये विकटाः महांतः मुकुटाः तेषां विटंकेभ्यः कपोतपालिकाभ्यः विप्रकीर्णानां समंततः पतितानां मुक्ताफलानां शंकायाः वदान्याः दातारः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येरणश्रमवारिशीकरनिकराः रणसंबंधिश्रमजन्यघर्मबिंदवः तैः कोरकिताः विशिष्टाः भालदेशाः येषांतैः सद्यश्छिन्नत्वान्मुक्ताफलसदृशघर्मबिंदुयुक्त
त्वं ॥ पु० ॥ रोषातिरेकेणरोषातिशयेनव्यतिकरितानि आरब्धानियानिदशनावलीनांदंतावलीनांदंशनानितैः पुनरुक्तः द्विगुणीकृतः रक्तिमायेषांतेअध
रोष्ठायेषांतैः दृष्टपूर्वातिरक्ताधरैरित्यर्थः ॥ ४ ॥ पद्यं ॥ नद्याःसुतेनभीष्मेणजनितैः भूरान्दुत्वाउत्पादितैः देववर्गैः स्वधाम्निस्वस्थानेस्वर्गेसांद्रेसंबाधेसति

नद्याःसुतेनजनितैर्नवदेववर्गैःसांद्रेस्वधाम्निसतिसंकुचितस्थितीनां ॥ स्वर्गौकसामजनिसास्वयमेवकाम्याकूलं
कषाकुशिकनंदनकोपमुद्रा ॥ ३८ ॥ भीष्मस्यकन्याजनपाणिपीडांपितुर्मुदेत्यक्तवतोपितस्य ॥ संघात्सुराणांसति
पुष्पवर्षेसंतानलाभोजनितद्विचित्रं ॥ ३९ ॥ ध ध ध ध

संकुचितास्थितिर्येषांतेषांस्वर्गौकसांसाप्रसिद्धाकूलंकषापूर्णाकुशिकनंदनस्यविश्वामित्रस्यकोपमुद्रात्रिशंकुराजार्थेनूतनस्वर्गनिर्माणविषयेकोपाकृ
तिः स्वयमेवात्मनैवकाम्याएषणीयाअजनिजातायदितदानींकुशिकनंदनेनद्वितीयसर्गः कृतः स्यात्तर्हिइदानींस्थितिसंकोचोनस्यात् इदानीमस्मत्सुखाय
भवेत् इतिइच्छासमुत्पन्नेतिभावः ॥ ३८ ॥ पितुः शंतनोः मुदेहर्षायकन्याजनानांपाणिपीडांविवाहंत्यक्तवतोपितस्यभीष्मस्यसुराणांसंघात् पुष्पवर्षेसतिसं १०
तानलाभः संततिप्राप्तिः अभूत् इतियत् तद्विचित्रं संतानस्यकल्पवृक्षविशेषस्यपुष्पाणिसंतानानितेषांलाभइत्यर्थात्परिहारः ॥ ३९ ॥ ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असौभीष्मः इत्थंएकदिनंसमीकंयुद्धंविधायकलापद्मबंधौसूर्येपाश्चात्यभूधरंअस्ताचलंउपेयुषिप्राप्तवतिसतिचापस्यशिखरात्अग्रात्अवरोपिताअ
धः कृताज्यायेनतथाभूतःसन्स्वस्यापिबलापहारंसामर्थ्यापहारंसेनानिवर्तनंचचकार केषामिवप्रत्यर्थिनामिवशत्रूणामिवयथाशत्रूणांबलापहा
रः कृतः तथास्वस्यापिबलापहारः कृत इत्यर्थस्वीकारेणचमत्कारः अर्थांतरंतु उक्तं ॥४०॥ ॥गद्यं॥ ॥इतिनवदिनानिनवनवानिनूतनेभ्योनूत
नानिभुजविलसितानिभुजक्रीडाः प्रकाश्यदशमेहनिपुनरप्यसौशांतमनाः स्वांतेनिहितोरमाकांतोयेनसः शांतनवः भीष्मः कुभटलोकानांधार्मि

इत्थंविधायदिनमेकमसौसमीकंपाश्चात्यभूधरमुपेयुषिपद्मबंधौ॥ प्रत्यर्थिनामिवचकारबलापहारंस्वस्यापिचापशिखरादव
रोपितज्यः॥४०॥ ॥गद्यं॥ इतिनवदिनानिनवनवानिभुजविलासितानिप्रकाश्यदशमेहनिपुनरसौनिजध्वजचिन्हमात्रंविय
दारोहतिसतिभगवतिविवस्वतिसमरवर्षासमयशिखंडिनागांडीवधन्वनापुरस्कृतंशिखंडिनंविलोक्यस्त्रीपूर्वोयममुनासह
नयोत्स्यमितिनिनिषिध्यहस्ततलनिरस्तधनुर्लस्तकः प्रथमंस्वदूरापसारकुपितयेवसिंजिन्यापश्चाद्दूरनिष्कासितैर्विजयविपाठैरादिव
सावसानमवदारितकलेवरतयानितांततांतः शांतनवः शांतमनाः स्वांतनिहितरमाकांतः कुभटलोकसमुचितांशरशय्यांक्रमादधिशिश्ये॥५॥

कुभटलोकानांसमुचितांशरशय्यांक्रमादधिशिश्ये शरतल्पेशयितवानित्यर्थः कथंभूतः भीष्मः भगवतिविवस्वतिसूर्येनिजध्वजस्यचिन्हंतालवृक्षः
तन्मात्रंतत्प्रमाणंयथातथावियत् आकाशंआरोहतिसतितत्समयेसमरएववर्षासमयः वर्षाऋतुः तत्रशिखंडिनामयूरेणतत्सदृशेनसमरविषयप्री-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिसुतेनगांडीवधन्वनाअर्जुनेनपुरस्कृतंस्वाग्रतःस्थापितंशिखंडिनंज्येष्ठंद्रुपदपुत्रंविलोक्यअयंपूर्वंस्त्रीरूस्त्रीपूर्वःजन्मकालेजन्मांतरेचस्त्रीसन्न
तःपुरुषोजातइत्यर्थःअमुनासहनयोद्धव्यमितिनिषिध्यहस्ततलात्निरस्तःत्यक्तःधनुर्लस्तकःधनुर्मध्योयेनसःत्यक्तचापइत्यर्थःपुनः० म
थमंस्वस्यदूरंअपसारःअपसरणंतेनकुपितयेवसिंजिन्यागुणेनपश्चात्दूरंनिष्कासितैःअपसारितैःआकर्णज्यामाकृष्यप्रयुक्तैरित्यर्थःविजय

॥ पद्यं ॥ पार्थेनक्षितिविनिखातपुंखकानांबाणानामुपरिपितामहःशयानः ॥ बभ्राजेव्रणबिलवांतरक्तबिंदु
धारागांघनइवशक्रकोपवर्षी ॥ ४१ ॥ ५ ५ ५ ५

विपाठैःअर्जुनबाणैःआदिवसावसानंसूर्यास्तपर्यंतंअवदारितंविभिन्नंकलेवरंयस्यतस्यभावस्तत्तातयानितांततांतःअत्यंतव्याकुलः ॥ ५ ॥ पद्यं ॥
पार्थेनअर्जुनेनक्षितौविनिखाताःआरोपिताःपुंखाःपश्चाद्भागाःयेषांतेषांबाणानामुपरिशयानःव्रणबिलैःक्षतछिद्रैःवांताःत्यक्ताःरक्तबिंदवोयस्य-
सः यद्वावमतेरकर्मकत्वंस्वीकृत्यकर्तरिक्तःतथाचव्रणबिलेभ्यःवांताःपतंतःरक्तबिंदवोयस्यसःपितामहःभीष्मः बभ्राजेशुशुभे कइवशक्रको ११
पवर्षीइंद्रकोपेनरक्तवृष्टिकर्ताधारागांघनइवमेघइव शक्रगोपवर्षीतिपाठेइंद्रगोपसंज्ञकलोहितकीटवर्षीमेघइवेत्युत्प्रेक्षा ॥ ४१ ॥ ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्ररणांगणेतं इमंभीष्मंशरेषुशयितंवीक्ष्यसांक्रामिकंसंसर्गजन्यंगुणंप्रतिपद्यमानइवप्राप्नुवानिवस्वयंउपात्तास्वीकृताकरोष्मणः किरणोष्मणःह
स्तपराक्रमस्यचशांतिर्येनसः भास्वानपितेजस्वीसूर्योपिपाश्चात्यसागरस्यपश्चिमदिक्स्थसमुद्रस्यशरेषुबाणेषुजलेषुचशयालुःनिद्राणःआसी
त् म्लानंशरतल्पस्थंभीष्मंदृष्ट्वासूर्यःस्वयमपिशांतःसन्समुद्रशरेषुशयितवानित्यर्थःतत्समयेसूर्योस्तंजगामेतिभावः ॥४२॥ जगतिविश्रुताविशे
षेणस्तुताकीर्तिर्यस्यतस्मिन्कवलितःनाशितःरिपुवर्गोयेनतस्मिन्जामदग्न्यस्यशिष्येभीष्मेकालधर्मंमृत्युंसूर्षतांप्र पन्नेप्राप्तेसतिबहूनांस्फुरवराणां

संवीक्ष्यतत्रतमिमंशयितंशरेषुसांक्रामिकंगुणमिवप्रतिपद्यमानः॥भास्वानपिस्वयमुपात्तकरोष्मशांतिःपश्चात्यसागरशरे
षुशयालुरासीत्॥४२॥ जगतिविश्रुतकीर्तौजामदग्न्यस्यशिष्येकवलितरिपुवर्गेकालधर्मंप्रपन्ने॥ बहुस्फुरवरस्त्राभाद्बद्धका-
मोत्सवानांश्वशुरमरणदुःखंस्वर्वधूनांबभूव॥४३॥ पतितेयुधिवाहिनीस्फुतेपतदश्रुर्द्विविधापिवाहिनी॥ प्रथमापरितापमुच्छ्रितं
पटवेश्मानियमौततःपरा॥४४॥
नूतनदेवानांलाभात्बद्धःआरब्धःकामोत्सवःस्फुरतोत्सवोयाभिस्तासांस्वर्वधूनांअप्सरसांश्वशुरम
रणस्यइदानींतनस्वपतिदेवनिर्मातृत्वेनश्वशुरोभीष्मःतस्यमरणदुःखंबभूव हितकृच्छ्वशुरमरणदुःखंबभूवेतिभावः॥४३॥ युधिवाहिनीस्फुतेभीष्मे
पतितेसतिद्विविधापिद्विप्रकारापिवाहिनीभागीरथीसेनाचपतंतिअश्रूणियस्यास्तथाभूताअभूत् तत्रप्रथमाभागीरथीउच्छ्रितंमहांतंपरितापंशो
कजन्यसंतापंययौ ततःपराद्वितीयासेनापटवेश्मानिययौ॥४४॥

अपरेअहनिभीष्मपतनदिनात् द्वितीयेहनिकौरवः दुर्योधनः चमूनांअधिपत्वेआधिपत्येकुंभयोनिंद्रोणंपरिकल्प्यकृत्वाभीष्मपाताद्धेतोः रुदितेन
रोदनेनउच्छूनाः शोथयुताः दृशोयेषांतेषांनराधिपानांराज्ञांपुरतःनिजगादउवाच ॥ ४५ ॥ कुंभात्उत्पन्नाजन्मनाप्रसिद्धः मुनिषुऋषभः श्रेष्ठःअगस्त्यः
विंध्यसंज्ञंक्ष्माधरंपर्वतमिवलोकेनाद्दग्विधः कुंभोत्पत्यादिनानत्सदृशः त्वंयुधिनिजमहसास्वप्रतापेनभूभृतःभूपालान्पर्वतांश्चस्तंभयित्वानतपराक्रम-

अपरेहनिकौरवश्चमूनामधिपत्वेपरिकल्प्यकुंभयोनिं ॥ पुरतोनिजगादभीष्मपाताद्रुदितोच्छूनदृशांनराधिपानां ॥ ४५ ॥ कुंभो
त्पत्याप्रसिद्धोमुनिऋषभइवक्ष्माधरंविंध्यसंज्ञंलोकेनादृग्विधस्त्वंयुधिनिजमहसाभूभृतःस्तंभयित्वा ॥ जीवग्राहंगृहीत्वाविन
मितवदनंलज्जयाधर्मसूनुंपद्भ्यामेवप्रचारंविदधतमधुनालीलयामेर्पयेति ॥ ४६ ॥ उदितंतदिदंनिशम्यगोष्ठ्यामुचितज्ञःकरमु
न्नमय्यकिंचित् ॥ गुहसन्निभविक्रमस्तदानींगुरुरेषोपिकुरूद्वहंबभाषे ॥ ४७ ॥

स्तंभनंकृत्वालज्जयाविनमितंअवाक्कृतं-
वदनंयेनतंपद्भ्यामेवचरणाभ्यामेवप्रचारंगमनंविधदतंकुर्वंतंधर्मसूनुंधर्मराजंलीलयाजीवग्राहंगृहीत्वाजीवंतंधृत्वेत्यर्थः अधुनामेमह्यंअर्पयदेहि-
इतिउवाचेतिपूर्वेणान्वयः जन्मनाप्रतापेनचागस्त्यसदृशस्त्वंभूभृत्स्तंभनंकृत्वाधर्मराजंधृत्वामेर्पयेत्यर्थः ॥ ४६ ॥ गोष्ठ्यांसभायांतत् इदंउदितंभाषितंनिश १२
म्यश्रुत्वाउचितज्ञःसम्यक्ज्ञातागुहेनकार्तिकेयेनतुल्यःपराक्रमोयस्यसः एषःगुरुरपिद्रोणोपितदानींकिंचित्करंउन्नमय्यउच्चं कृत्वाकुरूद्वहंदुर्योधनंबभाषे ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेनृपधर्मात्मजेधराधिनाथैः वीरभूपालैः परिवृतेसत्यपितेअखिलंअशेषंकांक्षितं इच्छाविषयंकर्तुंसंपादितुंशक्यंहिशक्यमेव परंतुशौरिणाकृ
ष्णेनप्रणुन्नाःप्रेरिताः येहयाः तेषांहेषितशब्दैः अश्वजातीयशब्दैःमिश्रितः नरस्य अर्जुनस्यशरासघोषः गांडीवधनुर्ज्याघोषः यदिनश्रूयतेतर्हि
त्वत्कांक्षितंकर्तुंशक्यमित्यर्थः अर्जुनाश्वधनुःशब्दश्रवणंयथानस्यात्तावद्दूरमर्जुनोनीतश्चेत्तर्हित्वत्कांक्षितंकुर्यामितिभावः॥४८॥ सर्वासां
अस्त्रविद्यानांसहवाससौख्यंएकत्रवाससौख्यंतस्यसंकेतभूमेः अस्मिन्स्थलेसर्वाभिरागत्यसहवाससौख्यमनुभवामइतिसंभाष्ययत्रमि-

कर्तुंहिशक्यमखिलंनृपकांक्षितंमेधर्मात्मजेपरिवृतेपिधराधिनाथैः॥शौरिप्रणुन्नहयहेषितशब्दमिश्रोनश्रूयतेयदिनर
स्यशरासघोषः॥४८॥ सर्वास्त्रविद्यासहवाससौख्यसंकेतभूमेरपितस्यवाचं॥मस्तकद्वयेयोतांपरिषद्गतानांतिर्यक्प्रचारः
शिरसोनृपाणां॥ ४९ ॥अथद्रुपदजद्रोणौरथद्विपहयावृतौ॥बद्धायतसमुत्साहौयुद्धायनिरगच्छताम्॥५०॥ ॥ ॥
श्रीराधादामोदरायनमः॥ छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

लित्वासौख्यमनुभवंतिसासंकेतभूमिः तद्रूपस्यमहावीरस्यापितस्यद्रोणस्यतांवाचंपरिषदिसभायांगतानांविद्यमानानांनृपाणांशिरसःतिर्य
क्प्रचारः वक्राचारः मस्तकद्वयेोसंमुखोयथाविस्मयेआश्चर्यं अनुमोदनार्थंशिरश्चालनार्थेनपरिहारः॥४९॥ अथरथद्विपहयैःआवृतौबद्धःधृतः
आयतः दीर्घः समुत्साहोयाभ्यांतौद्रुपदजद्रोणौसेनापतीयुद्धाययुद्धंकर्तुंनिरगच्छताम्॥५०॥ ॥छ॥ ॥छ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उभावपितौराजवर्गौनाम्नः भीष्मनाम्नः अक्षरैः लिखिताक्षरैः अंकिताः चिन्हिताः येनदीकृतबाणाः भीष्मबाणाः तैः कीर्णेव्याप्तेरंगेयुद्धसभायां-
अवतेरतुः आजग्मतुः कीदृशौराजवर्गौ सक्ष्वेडितौससिंहनादौ बिरुदैः स्वशौर्यप्रख्यापनायधृतचिन्हैः सिंहव्याघ्राद्यंकितध्वजादिभिः सहितौस
दजन्या इट्टहासेनसशब्दहास्येनसहितौसंस्फालितं आस्फालितं अंसशिखरं स्कंधाग्रंयाभ्यांतौतथासहवल्गनौत्वंहतोसीत्यादिगर्वोक्त्यासहितौ
॥५१॥ एकत्रएकस्मिन्स्थलेगाढंसांद्रंयथातथामिलिताः अवनिवल्लभानांभूपानांयाः वाहिन्यः सेनाः तासांअक्षौहिणीः एतन्नामकसंख्याः सु

नामाक्षरांकितनदीकृतबाणकीर्णेरंगेवतेरतुरुभावपिराजवर्गौ॥ सक्ष्वेडितौसबिरुदौसमदाट्टहासौसंस्फालितांसशिख
रौसहवल्गनौतौ ॥५१॥ अक्षौहिणीरवनिवल्लभवाहिनीनामेकत्रगाढमिलिताः कृतरामसोढा॥ सायुद्धभूमिरुपरीवसमु
त्सतंतीसांद्रारजःपटलिकासमदृश्यताभ्रे॥५२॥ भेरीरवेगगनवाहिनिबाहुलीलांद्रोणस्यवीक्षितुमनोभिरदृष्टपूर्वां॥मध्ये
विसृज्यदिविजंभभिदेवकाशंतस्थेभितस्त्रिदशकिंनरयक्षसिद्धैः॥५३॥

नरांअत्यंतंअसोढाअसहिष्णुः सायुद्धभूमिः उपरि ऊर्ध्व
भागेसमुत्सतंती वड्डुयनंकुर्वतीवअभ्रेआकाशेसांद्रानिबिडारजसांपटलिकासंहतिः समदृश्यतदृष्टा यदोभयेसेनेरणांगणमागतेतदाबहुरजः
पटलंआकाशमुत्पपातेत्यर्थः ॥५२॥ भेरीणांरवेगगनशायिनिगगनंप्रतिगतेसतिपूर्वंअदृष्टाअदृष्टपूर्वांतांद्रोणस्यबाहुलीलांवीक्षितुमनोभिः द्र
ष्टुकामैः त्रिदशकिन्नरयक्षसिद्धैः दिविआकाशेमध्येमध्यभागेजंभभिदेइंद्रायअवकाशंविसृज्यविमुच्यअभितः उभयभागेनस्थेस्थितंप्रमूणांनिरीक्षणा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थंमध्येवकाशंमुत्क्वासेवकानांउभयतः स्थितिरितिरीतिरेव ॥५३॥ ॥गद्यं॥ ततः वस्कधानलेनिहितः स्थापितः वामजानुभागोयैस्तेसर्वेपिनरें
द्राः राजानः व्यालग्राहिणश्चक्ष्वेडितमंत्रंसिंहनादात्मकमंत्रंउदीर्यउच्चार्यतूणीराएवपेटकाः तेभ्यः समुत्थापितान्प्रकटीकृतान्जीवाकर्षणेमौर्व्या
कर्षणेप्राणहरणेत्वसमुपजातात्वरायेषांतान् पुरुषान् कठिनान् क्रूरांश्चभीषणान् भयंकरान्विषैर्दिग्धान् लिप्तांश्चविनतातनयेनगरुडेनसहगमन
विषयेजातिवैरेणचनिबद्धः स्पर्धाभरोयैस्तान्तक्षकंछेदकंमुखंअग्रभागोयेषांतान् पन्नगपक्षेतक्षकादीन्बाणपन्नगान् नभोभुविआकाशस्थले

॥गद्यं॥ ततस्तेसर्वेपिनरेंद्रावस्कधानलनिहितवामजानुभागाः क्ष्वेडितमंत्रमुदीर्यतूणीरपेटकसमुत्थापितान्जीवाकर्षणसमुप
जातत्वरान्परुषभीषणविषदिग्धान्विनतातनयनिबद्धस्पर्धाभरान्तक्षकमुखान्बाणपन्नगान्नभोभुविचिरंनर्तयंतः परस्परं
परिपंथिनांप्राणपवमानमपीप्यन् ॥ ६॥ ॥पद्यं॥ कलशीतनयेथकार्मुकंस्ववलयीकुर्वतिवैरिधन्विषूनां ॥ युधिकेवलमेवचापदंडा
धृतजीवाजनदृस्पथेष्वतिष्ठन् ॥५४॥ चिरंनर्तयंतः गमयंतः संतः खेलयंतः संतश्चपरस्परंपरिपंथिनांशत्रूणांप्राणपवमानंप्राणवायुंअपीप्य
न्पाययामासुः ॥६॥ ॥पद्यं॥ अथकलशीतनयेद्रोणाचार्येस्वंकार्मुकंधनुः वलयीकुर्वतिबाणसंधानंकृत्वाआकर्षतिसतिवैरिणः येधन्विषुवानः धा
नुष्कतरुणाः तेषांचापदंडाः युधिकेवलंजनानांदृक्पथेषुदृष्टिमार्गेषुधृतजीवाः धृतमौर्विकाः धृतप्राणाश्चअतिष्ठन् आसन्द्रोणाचार्यपुरतः कैरप्यरि-
धानुष्कैः स्वधनुः सज्जंनकृतमित्यर्थः ॥५४॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधातुः ब्रह्मणः सृष्टिं विपरीतरूपां विधातुं कर्तुं उद्युक्त एव एषः वीरः द्रोणः शराभिवर्षेण बाणवृष्ट्या राज्ञां वैरिनृपाणां कबंधानि शरीरस्य शिरोधो
भागाः ऊर्ध्वे उपरि च कार शिरांसि अधस्तात् अधोभागे चकार  विधातृसृष्टौ उपरि शिरः अधः कबंधं वर्तते  अनेन शिरांसि छित्वा भुवि पातितानि नि
केवलं कबंधा इतस्ततो गच्छंत्याकाशे उसर्नंति चातो विपरीता सृष्टिः कृता किमित्युत्प्रेक्षा ॥५५॥  यावत्तेनामर्दनं चलितं तावत् वलक्षैः शुभ्रैः

विधातृसृष्टिं विपरीतरूपां विधातुमुद्युक्त इवैष वीरः ॥ शराभिवर्षेण चकार राज्ञामूर्ध्वे कबंधानि शिरांस्यधस्तात् ॥५५॥
ताव द्घोटैर्वलक्षैर्वलयितसविधे तस्थिवांसं शतांगे भारद्वाजो जिघृक्षुर्नृपतिमभिययौ भल्लवर्षं विमुंचन् ॥ दंष्ट्रारोचिः
शलाकास्तुमुलमवकिरन्दिक्षु सर्वासु घोरः शीतांशुं मध्यसीम्नि स्थितमिव परिधेः सिंहिकायाः कुमारः ॥ ५६ ॥

घोटैः वलयितः सविधः समीपभागो यस्य तस्मिन् शतांगे रथे तस्थिवांसं स्थितं नृपतिं धर्मराजं जिघृक्षुः ग्रहीतुमिच्छुः भारद्वाजः द्रोणः भल्लव
र्षं बाणवृष्टिं विमुंचन् सन् अभिययौ संमुखो जगाम  कः कमिव परिधेः परिवेषस्य मध्यसीम्नि मध्यभागे स्थितं शीतांशुं चंद्रं जिघृक्षुः घोरः सिंहिकायाः कु
मारः राहुः सर्वासु दिक्षु दिशासु दंष्ट्रारोचिषः शलाकाः शलाकाकारसूक्ष्मदंष्ट्रारोचींषि तुमुलं सांद्रं अवाकिरन् वर्षन् सन् यथाभियाति तद्वत् ॥ ५६ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग० ॥ ततः नदीयानां द्रोणीयानां मार्गणगणानां बाणसमूहानां अभिघातैः प्रहारैः निवर्तितानि पश्चात्कृतानि सुखानि येषां तैः निजशिलीमुखैः-
स्वबाणैः सह दूरं उपयातान् गतान् मातरिश्वा वायुः वैश्वानरः अग्निः आश्विनेयौ च ते षां तनयाः पुत्राः भीमसेनधृष्टद्युम्ननकुलसहदेवाः प्रभृत
यो येषां तान् प्रवीरान् महावीरान् क्षितिपतिरथं रक्षंति तान् अभितः वीक्ष्यमाणेन माधवेन धाव्यमानाः त्वरया गम्यमानाः तुरगाः यस्य तेन शतां

ततः ॥ ग० ॥ नदीयमार्गणगणाभिघातनिवर्तितसुखैर्निजशिलीमुखैः सहदूरमुपयातान्मातरिश्ववैश्वानराश्विनेयतनयप्रभृती
न्क्षितिपतिरथरक्षिणः प्रवीरानभिवीक्ष्यमाणेन माधवेन धाव्यमानतुरंगेण शतांगेन प्लवंगकेतनो नगेंद्रो नदीप्रवाहमिव निर्नि
रोधरथचर्येन माचार्यमुपरुरोध ॥ ७ ॥ ॥ पद्यं ॥ शिवयुद्धकृतस्तस्य द्रोणयुद्धेप्यभून्मनः ॥ सर्वोपि जनता श्रेयः कांक्षते ह्युत्त
रोत्तरं ॥ ५७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

गेन रथेन प्लवंगकेतनः अर्जुनः नगेंद्रः महापर्वतः नदीप्र
वाहमिव निर्निरोधा निरोधरहिता रथचर्या रथगमनं यस्य तं आचार्यं द्रोणं उपरुरोध द्रोणधर्मराजयोर्मध्ये बभूवेत्यर्थः ॥ ॥ पद्यं ॥ शिवेन सदाशिवे
न अल्पमानेन च युद्धकृतः तस्य अर्जुनस्य द्रोणाचार्येण शिवापेक्षया द्रोणसंज्ञकाधिकमानेन च यत् युद्धं तत्रापि मनो मनोरथः अभूत् श्लेषेणोक्तम
र्थं सामान्येन समर्थयति सर्वेति तथाहि सर्वोपि जनता जनसंमूहः उत्तरोत्तरं अधिकादधिकं श्रेयः कल्याणं कांक्षते इच्छति ॥ ५७ ॥ ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भग्न्यर्जुनयोः धनंजयशब्दवाच्यत्वात्पस्यधनुषः दाताग्रहीताप्रतिग्रहीतापिधनंजयावितिउद्दामशब्दौप्रौढशब्दौभुवनेषुस्वर्गमृत्युपातालेषु
स्थितौ अस्यगांडीवनाम्नः धनुषः विस्फारघोषः ज्याशब्दः विजृंभतेस्मवव्रृधे कथंभूतः शब्दः द्विषतांशत्रूणांअसह्यः तथाभूयान्महान् ५८
मात्स्यपुर्याविराटनगर्यांपुण्यकीर्तेः मेज्यायसः ज्येष्ठबंधोः धर्मस्यएषांपक्षिणांनामकंकइतिसंज्ञाइष्टंप्रियंआसीत् इतीवअस्माद्धेतोरिवएए
षः अर्जुनः गांडीवात् उत्थितैः बाणैः हतानांद्विषतांक्रव्यैर्मांसैः कंकान् एतत्संज्ञकपक्षिणः पर्यतार्प्सीत्तृप्तान्चकारेत्यर्थः ॥५९॥ ॥गद्यं

दाताग्रहीताचधनंजयावित्युद्दामशब्दौभुवनेषुयस्य॥विस्फारघोषोधनुषोस्यभूयान्विजृंभतेस्मद्विषतामसह्यः॥५८॥नामैषां
मेज्यायसःपुण्यकीर्तेरासीदिष्टंमात्स्यपुर्यामितीव॥गांडीवोत्थैरेषबाणैर्हतानांकंकान्क्रव्यैर्विद्विषांपर्यतार्प्सीत्॥५९॥ ॥गद्यं॥
तदनुसव्यसाचिशरवीचिनीचीकृतभुजदंभविजृंभःकुंभसंभवःसमरायपरिगृहीतेषुसंविधानेषुतूणीमात्रमेवप्रतिभटाभिमुखं
विदधानैर्योधैःसाकंचंडभानुश्चरमगिरेरिवस्वयमपिकटकसीमानमासीदत्॥८॥
तदनुअर्जुनागमनानंतरंसव्यसाचिनःअर्जुन-
स्यशरवीचिभिःबाणपरंपराभिःनीचीकृतःअल्पीकृतःभुजदंभविजृंभःबाहुगर्वविकासोयस्यसःकुंभसंभवःद्रोणःसमरायुद्धार्थंप्रतिगृहीतेषुसं
विधानेषुखड्गधनुरादिसाधनेषुमध्येतूणीमात्रमेवइषुधिमात्रमेवप्रतिभटानांशत्रुभटानांअभिमुखंसन्मुखंविदधानैःकुर्वाणैःस्वपृष्ठंप्रदर्श्यपलायमा १५
नैरित्यर्थः योधैःसाकंचंडभानुःसूर्यःचरमगिरेःअस्ताचलस्यकटकसीमानंनितंबप्रदेशमिवस्वयमपिकटकसीमानंसेनानिवेशस्थानंआसीदत्प्राप॥८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्यं॥ अन्येद्युः द्रोणयुद्धस्य द्वितीयदिवसे कृष्णेन क्लृप्तः कृतः प्रसंगः सारथ्यार्थं संगतिर्यस्य तस्मिन्विजये अर्जुने द्रोणेन संचोदितः प्रेरितः यः नृपः दु-
र्योधनः तस्य वचनेन तस्थिवद्भिः राज्ञां कुर्वद्भिः त्रिगर्तैः त्रिगर्तदेशीयसुशर्मप्रभृतिभिः आहूते इतो युद्धाय एहीत्याकारिते अतस्तैः सह योद्धुं अन्यत्र
गतवति सति कृष्णेन सह अर्जुने संशप्तकैः सह योद्धुमन्यत्र गतवति सतीत्यर्थः प्रातः प्रातःकाले एव ते धार्तराष्ट्राः दुर्योधनादयः वीताः गताः भीः भयं
येषां तैः अनीकैः सैन्यैः सह परबलं पांडवसैन्यं अभजन् प्रापुः केकैः किमिव यथा चमराः मृगविशेषाः बल्गावद्भिः सशब्दैः स्वयूथैः स्वजातीयसमूहैः

॥पद्यं॥ अन्येद्युर्द्रोणसंचोदितनृपवचने तस्थिवद्भिस्त्रिगर्तैराहूतेऽन्यत्र योद्धुं गतवति विजये कृष्णक्लृप्त प्रसंगे॥ प्रातस्ते धार्तराष्ट्राः पर
बलमभजन्वीतभीकैरनीकैर्दावज्वालेन शून्यं वनमिव चमरा वल्गवद्भिः स्वयूथैः॥ ६०॥ भारद्वाजोऽपि तस्मिन्नहनि कुरुपतेर्वांछितार्थं वि
धास्यन्रंध्रान्वेषैकतानो रथमयनिकषा स्थापिते धर्मसूनोः॥ कृष्णाभ्यां रक्षणाय प्रथितभुजमदे सत्यजित्यत्स्फुलिंगं दृष्ट्योर्युग्मं विधा
य प्रतिभटपृतनाकुक्षिमाविक्षदेकः॥ ६१॥

सह दावस्य वनाग्नेः ज्वालेन ज्वालया शून्यं वनं भजंति तद्वत्॥ ६०॥ अथ तस्मिन्नहनि रंध्रान्वेषणे श
त्रोश्छिद्रदर्शने एकतानः अनन्यवृत्तिः तदेकलक्ष्य इत्यर्थः एकः एकाकी भारद्वाजोऽपि द्रोणोऽपि धर्मसूनोः रथं निकषा रथस्य समीपे कृष्णाभ्यां कृष्णार्जुना
भ्यां नृपरक्षणार्थं स्थापिते प्रथितः प्रसिद्धः भुजमदो यस्य तस्मिन्सत्यजिति एतत्संज्ञके राजनि उज्वरंतः स्फुलिंगाः क्रोधाग्निकणाः यस्मात्तत् दृष्ट्योः नेत्र
योः युग्मं विधाय कृत्वा कुरुपतेः दुर्योधनस्य वांछितार्थं धर्मराजं धृत्वा प्रत्यर्पणरूपं विधास्यन् करिष्यन् सन् प्रतिभटपृतनायाः शत्रुसेनायाः कुक्षिं मध्यदेशं आवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षत्प्रविवेश ॥ ६१ ॥ अथचिरेणबहुकालंयुध्वारथ्यान्द्रोणरथवहान् अश्वान्युगमात्रंहस्तचतुष्टयप्रमाणंअपास्यउच्चाल्यपश्चात्त्यक्त्वानिर्धूनि
तेनसत्यजितातिरस्कृतेनअतएवसरूषागुरुणा द्रोणेननि कृत्तंछिन्नंतस्यसत्यजितः वरांगंमस्तकंरंगभुविरणांगणेयुधिष्ठिरस्यबाष्पांबुभिःदुः
खजन्यबाष्पोदकैः सहप्रपात ॥ ६२ ॥ तस्मिन्द्रोणेउच्चयामहत्यात्वरयाउपकंठंसमीपंआगतेसति तंद्रोणंअग्रेपश्यतः पार्थस्यधर्मराजस्यप्राणाअ

युध्वाचिरेणयुगमात्रमपास्यरथ्यान्निर्धूनितेनसरुषागुरुणानिकृत्तं ॥ तस्याथरंगभुविसत्यजितोवरांगं बाष्पांबुभिःसहपपातयुधि
ष्ठिरस्य ॥ ६२ ॥ उच्चयात्वरयातस्मिन्नुपकंठंसमागते ॥ पार्थस्यपश्यतोग्रेतंप्राणाअपितथाचरन् ॥ ६३ ॥ तस्याथदृष्टसेनाजलधिक
वलनात्कुंभयोनित्वकीर्तिस्पष्टीकर्तुंस्वकीयामिवकुतुकवतःपार्श्वमभ्येत्य कोपात् ॥ भीमोरथ्यानमथ्नात्द्रुपदतनुभवः सूदयामा
ससूतंकोदंडंकेतुदंडं द्वयमपिशकलीचक्रतुर्दस्रपुत्रौ ॥ ६४ ॥

पितयाआचरन्उपकंठंआगताबभूवुः भयेनबहिर्निर्गमार्थंकंठसमी
पमागताबभूवुरित्यर्थः ॥ ६३ ॥ अथदृष्टृणांशत्रूणांसेनाजलधेःकवलनात्नाशात्पानाच्चहेतोः स्वकीयांकुंभयोनित्वकीर्तिंकुंभसंभवत्वकीर्तिंस्प
ष्टीकर्तुमिवकुतुकवतः कौतुकिनः तस्यद्रोणाचार्यस्यपार्श्वंअभ्येत्यभीमः कोपात्रथ्यान्रथाश्वान्अमथ्नात्जघानद्रुपदतनुभवः धृष्टद्युम्नः सूतंसा
रथिंसूदयामासजघान दस्रपुत्रौनकुलसहदेवौकोदंडंकेतुदंडंचद्वयमपिशकलीचक्रतुःचिछिदतुः ॥ ६४ ॥ ७ ७



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गद्यं ॥ ततः स्कप्रतीकं एतन्नामकमैरावत कुलसंभवं गजं अधिरूढः रणेयुध्धकर्मणिमत्तः भगदत्तः राजाताहृशंअतिशयितंकुंभसंभवस्यद्रोण
स्य अभिषंगंपराभवं वीक्ष्यक्रोधनतयाक्रोधवत्तया समस्तानिहास्तिकानि हस्तिवृंदानिपुरस्तात् स्वाग्रभागेविस्तार्यप्रसार्य हठेन बलात्कारे
णभीमंअभिदुद्रावसंमुखोजगाम कीदृशानिहास्तिकानि कर्णतालानांयेसमीरणाः वायवः तेषांसमृध्ध्यापरिणताः उत्पन्नाः येचक्रवाताः

गद्यं ॥ ततस्ताहृशंकुंभसंभवस्याभिषंगमभिवीक्ष्य क्रोधनतयाकर्णतालसमीरणसमृध्धिपरिणतचक्रवातगर्भपरि
भ्रमद्रथकेतुपताकापटसहस्रसंपादितसमरसागरावर्तवशंवदफेनकूटशोभानिसकलदिङ्मुखघंटापथजांघिकघंटाभर
णरणितबधिरीकृताष्टलोकपालपुरजनानिनिबिडस्फुरसमाजसमाक्रांतगगनमंडपसंधिबंधस्थि रीकरणायदत्तानिंद्रनी
लस्तंभानिवसुंडादंडानुन्नमयमानानिसमस्तानिहास्तिकानिपुरस्ताद्विस्तार्यरणमत्तोभगदत्तःस्कप्रतीकमधिरूढोहठाद्भी
ममभिदुद्राव ॥ ९ ॥

तेषांगर्भेषुमध्यभागेषुपरिभ्रमत्रथकेतुपटानांसहस्रंतेनसंपादितासमरसागरावर्तानांबशंवदाअव
श्यप्राप्ताफेनकूटानांफेनराशीनांशोभायैस्तानि पु० सकलेषुदिङ्मुखानांघंटापथेषुविस्तीर्णनिकटपुरोभागेषुजांघिकंजवेनगमनकर्तृयत्घंटा
नांआभरणानांचरणितंशब्दः तेनबधिरीकृताः अष्टलोकपालपुराणांजनाः यैस्तानि पुनः कथंभूतानि निबिडः यः स्फुरसमाजः देवसमूहः तेनसमाक्रां
तंस्यगगनमंडपस्यसंधिबंधानांस्थिरीकरणायदृढीकरणायदत्तान् इंद्रनीलस्तंभानिवसुंडादंडान् ऊर्ध्वंउन्नमयमानानिउन्नतान्कुर्वाणानि ॥ ९ ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्यं ॥ द्विषतांबलौघः सेनासमूहः घोरेस्कप्रतीकेगजेअभियातेसंमुखमायातेसतिदूरंससर्प दूरंपलायनंचक्रेइत्यर्थः कस्मिन्सतिकइवपरश्वधः 
परशुः अस्यास्तीतिमत्वर्थीयच्प्रत्ययः परशुरामः तस्यास्त्रेबाणेपतितेसतिपश्चिमस्यनदीनांपत्युः समुद्रस्यअंबुपूरइव निःक्षत्रियांपृथ्वींब्राह्मणायदत्वा 
स्ववासार्थस्थलंयाचितोपिसमुद्रः परशुरामायनददौतदातेनबाणक्षेपेणापसारितइतिपौराणिकाः ॥ ६५ ॥ भीमः केतून्ध्वजान्पातयतः रथान्श्ल
थयतः शिथिलसंधीन्कुर्वतः दंतावलान् गजान् कृंततः छिंदतः अश्वान्पाटयतः विदारयतः विद्विषांशत्रूणांद्विपान्गदयाविभिद्यतंस्कप्रतीकंक्षणात्

घोरेभियातेसतिस्कप्रतीकेदूरंससर्पद्विषतांबलौघः ॥ परश्वधास्त्रेपतितेंबुपूरःपत्युर्नदीनामिवपश्चिमस्य ॥ ६५ ॥ केतून्पा
तयतोरथान्श्लथयतोदंतावलान्कृंततोघोटान्पाटयतोविभिद्यगदयाभीमोद्विपान्विद्विषां ॥ संग्रामांगणरक्तवारिलहरीसं
लक्ष्यमाणस्वकच्छायामात्रसहायमेवविदधेतंस्कप्रतीकंक्षणात् ॥ ६६ ॥ पादाग्रहस्तरदनप्रतिघातलीलाभग्नारिरक्तमसृ
णोभगदत्तदंती ॥ आलक्ष्यतक्षितिभृतस्तटवप्रकर्मण्यालिप्तगात्रइवगैरिककर्दमेन ॥ ६७ ॥

संग्रामांगणेरक्तवारिलहरीषुसं
वीक्ष्यमाणादृश्यमानास्वकच्छायास्वप्रतिबिंबंतदेवतन्मात्रंसहायः द्वितीयः यस्यतमेवविदधेचकार भीमः सर्वहस्तिसैन्यंहत्वातमेकंस्कप्रतीकमेवाव
शिष्टंचकारेत्यर्थः ६६ पादाग्राणांहस्तस्यशुंडायाश्चरदनयोश्चयाप्रतिघातलीलाप्रहारलीलातयाभग्नाः हताः येअरयः तेषांरक्तैः मसृणः क्लिन्नः भगदत्त १७
हस्तीक्षितिभृतः नटेयत्वप्रकर्मदंतप्रहारलीलातस्मिन्गैरिककर्दमेनपीतरक्तादिमृत्तिकाकर्दमेनलिप्तगात्रइवलिप्तांगइवआलक्ष्यतअदृश्यत भयंकररूपोदृश्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेतिभावः ॥६७॥ तदनुतत्ररणांगणेदलितंपरबलंशत्रुसैन्यंयेनतंदंत एवकुंतः तंवहंतंधारयंतंकरटिमल्लंगजश्रेष्ठंआपतंतंस्वोपरिआगच्छंतंवीक्ष्यसंग
रेयुद्धेचकिताभीताहृदयवृत्तिःअंतःकरणवृत्तिर्यस्यतस्यवायुसूनोःभीमस्यजंघयोर्जनकगुणस्यस्वपितुःवायोःगुणस्यवेगगुणस्यसमृद्धिःआ
विरासीत् प्रकटीबभूव स्वोपरिआगच्छंतंगजंदृष्ट्वाभीमःपलायनंचकारेत्यर्थः ॥६८॥ ॥गद्यं॥ इतिएवंप्रकारेणसुप्रतीकेनक्षुभितायेनिज
ध्वजिनीचराःस्वसैनिकाःतेषांकोलाहलस्यकलकलशब्दस्यसमाकर्णनेनसमाकुलंससंभ्रमं मानसंयस्यसः वासवसूनुः अर्जुनः महद्भि

तदनुकरटिमल्लंतत्रवीक्ष्यापतंतंदलितपरबलंतंदंतकुंतंवहंतं ॥ चकितहृदयवृत्तेःसंगरेवायुसूनोर्जनकगुणसमृद्धिर्जं
घयोराविरासीत् ॥६८॥ गद्यं ॥ इतिसुप्रतीकसंक्षुभितनिजध्वजिनीचरकोलाहलसमाकर्णनसमाकुलमानसोवा
सवसूनुर्महेषुनिषूदितावशेषसंशसकदूरनिरासप्रयुज्यमानवायव्यास्त्रवेगार्धंविभज्यनिजरथायवितीर्णवानिवतू
र्णमासाद्यनिर्वेलभुजगर्वदुर्विलसितौकुंभजातकिरातराजौनिरुध्यचिरेणयोधयामास ॥१०॥ रिपुभिःनिषूदितानांहतानां
अशेषाणांसंशसकानांएतत्संज्ञकभटानांदूरनिवासेदूरापसरणविषयेप्रयुज्यमानस्यवायव्यास्त्रस्ययोवेगःतस्यअर्धंविभज्यविभागंकृत्वा
निजरथायवि तीर्णवानिवदत्तवान्सन्निवतूर्णंशीघ्रंयथातथाआसाद्यवायुवेगेनरथेनतंदेशंप्राप्येत्यर्थःनिर्वेलंअमर्यादंभुजगर्वस्यदुर्विलसितं
दुश्चेष्टितंययोस्तौकुंभजातकिरातराजौद्रोणभगदत्तौनिरुध्यचिरेणबहुकालंयोधयामास युद्धंकारयामास ॥१०॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्यं ॥ ततः मदावलेंद्रस्यगजेंद्रस्यकरेशुंडादंडेपार्थस्यअर्जुनस्यमनः मनोभिलषितंरथंचहंतुंनाशयितुंप्रवृत्तेसतिशौरेः कृष्णस्यसारथ्येसार
थिकर्मणियच्चातुर्यंकौशलंतद्वशेनतद्धेतुनातस्यैवगजेंद्रस्यैवसः मनोरथः भग्नः अभूत् यत्रस्थलेगजेनप्रहारः कृतः ततोन्यत्ररथस्यनयनात्
गजाभिलषितंनाभूदितिभावः ॥ ६९ ॥ तदनुतस्यपार्थस्यवधायप्रहितामुक्ताभगदत्तस्यशक्तिः एतत्संज्ञकमल्पकुंताकारमायुधंपथिमार्गेशरैः
पार्थबाणैःभंगंपयौप्राप शक्तेर्भंगेकारणमाह प्रस्थानेति यत्यतः प्रस्थानकर्मणः समयेतस्याः भयदायिप्रीतिजनकंसमीपेनागस्यगजस्य

पद्यं ॥ ततः ॥ मनश्चपार्थस्यरथंच हंतुंमदावलेंद्रस्यकरेप्रवृत्ते ॥ सारथ्यचातुर्यवशेनशौरेर्भग्नः सतस्यैव
मनोरथोभूत् ॥ ६९ ॥ पार्थस्यतस्यतदनुप्रहितावधायभंगंययौपथिशरैर्भगदत्तशक्तिः ॥ प्रस्थानकर्मस
मयेभयदायितस्यानागस्यदर्शनमजायतयत्समीपे ॥ ७० ॥ अथतेनहरेःकृतायमुक्तंहृदिकृत्यस्वयमा
त्मदैवमस्त्रं ॥ तदिदंवनमालयामुकुंदः सहवास्तव्यकुटुंबितामनैषीत् ॥ ७१ ॥ दर्शनंअजायत प्रस्थानवेलायांभयजन

कप्राणिदर्शनमपशकुनइतिमौहूर्तिकाः ॥ ७० ॥ अथमुकुंदः हरेः इंद्रस्यकृतायअर्जुनंहंतुमित्यर्थः तेनभगदत्तेनमुक्तंआत्मास्वयंदेवोदेवतायस्यतत्वैष्ण
वमित्यर्थः अस्त्रंस्वयंहृदिकृत्यवक्षस्थलेगृहीत्वातदिदंअस्त्रंवनमालयास्वकंठस्यमालयासहवास्तव्यः सहनिवासकर्तायः कुटुंबीतस्यभावस्तत्तातांअ
नैषीत्प्रापयामास कृष्णः उत्थायतदस्त्रंस्वहृदयेगृहीत्वावनमालावद्धारयामासेत्यर्थः ॥ ७१ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्ररणांगणेसः फल्गुन्यां उ त्तराफल्गुन्यांजातः फल्गुनः जातार्थप्रत्ययस्यश्रविष्ठेत्यादिनालुक् अर्जुनः अंत्याक्षरेणनकारेणवर्जितंरहितं स्वकीयंफल्गुनइतिनामतत् फल्गुइतिचिकीर्षुंकर्तुमिच्छुं लक्षणयाफल्गुशब्दार्थंतुच्छंकर्तुमिच्छुः क्रौंचाचलात्समग्रद्वीपस्थमहापर्वतादपिपी वरंपुष्टंअरातेःशत्रोः करेणुंस्वप्रतीकंगजंबाणैः आद्येनअक्षरेणककारेणयोयोगः संबंधः तेनशून्यंरहितंचकार करेणुशब्दस्यककारेग तेसतिरेणुरित्यवशिष्टंलक्षणयातदर्थीरजः चूर्णंचकारेत्यर्थः ॥७२॥ तदाअसौमघवत्सूनुः अर्जुनः मदपंकस्यललामंपुंड्रं तस्यगंधः

सफल्गुनस्तत्रचकार बाणैश्चिकीर्षुमंत्याक्षरवर्जितंस्वं ॥ क्रौंचाचलात्पीवरमप्यरातेःकरेणुमाद्याक्षरयोगशून्यं ॥७२॥
मदपंकललामगंधिफालंमघवत्सूनुररेर्निपात्यशीर्षं ॥ पृथुलांमुदमादधात्ततोसौपृथिवीगंधवतीतिगौतमोक्तेः ॥७३॥
भगदत्तेवधंयातेसहमत्तेनदंतिना ॥ सत्यजिन्नाशशोकार्तिमत्यजन्पार्थसैनिकाः ॥७४॥

सुगंधोस्यास्तीतितत्तादृशंफालं ललाटंयस्यतत् अरेः भगदत्तस्यशीर्षंमस्तकंनिपात्यभूम्यांपातयित्वागंधवतीपृथ्वीइतिपृथिव्याः लक्षणकर्त्रीयागौतमऋषेःउक्तिःतस्याः हेतोः तल्लक्षणसमन्वयात्धेतोः पृथुलांमुदंआनंदंआदधात् दधार ॥७३॥ पार्थसैनिकाः मत्तेनदंतिनागजेनसहभगदत्तेवधंयातेप्राप्तेसतिसत्य-जिन्नाशेनद्रोणकृतसत्यजिद्वधेनयः शोकः तस्यआर्तिबाधांअत्यजन् महानंदलाभेनपूर्वोल्पशोकोगच्छतीतिसर्वानुभवः ॥७४॥ ॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गद्य॥ तदनुनाम्नाअरुणेतेजस्विसूर्ये संध्ययाधिसंध्यारागेणापिनादृशे अरुणेआरक्तेसतिस्वयनाम्नागुरुरपिव्यथयापितादृग्विधःगुरुः 
महाव्यथाविशिष्टः कलशयोनिः द्रोणःत्रिभिरेवअंगैः भीमेनसर्वगजसैन्यवधस्यकृतत्वात् अश्वरथपदातिभिः त्रिभिरेवसेनांगैःविरलिते 
नविरलीकृतेनबलेनसैन्येनअनुगम्यमानः सन्तादात्विकंतदानींतनंस्वमनोरथमिवधर्मराजंधृत्वाप्रत्यर्पणरूपमनोरथमिवदूष्यतांदोषंपटवेश्म
त्वंचउपगतंप्राप्तंआवासंवसतिस्थानंशनैः शनैःआववृतेआजगाम मनोरथावासयोर्दूष्यताधर्मसाधर्म्याद्उपमानोपमेयभावः॥११ ॥पद्यं॥

गद्यं॥ तदनुनाम्नारुणेतेजसिसंध्ययापितादृशेकलशयोनिःस्वयंनाम्नागुरुरपिव्यथयापितादृग्विधस्त्रिभिरेवांगैर्विर
लितेनबलेनानुगम्यमानस्तादात्विकंस्वमनोरथमिवदूष्यतांमुपगतमावासंशनैःशनैरावव्रृत्ते॥११॥ ॥पद्यं॥शिबिरमे
त्यतदैवसुयोधनःशितशरव्रणमोचितकंचुकं॥मृदुलमंचगतंकलशोद्भवंविरचितांजलिरेवमभाषत॥७५॥महारथत्वं
ममवांछितद्रुफलेग्रहिंनप्रतनोषियस्मात्॥कृपेतिशब्दोपिबभूवनूनंह्रस्वस्त्वयिश्यालइवत्वदीये॥७६॥ तदैवद्रोणागमन
समयेएवसुयोधनःशिबिरंद्रोणावासपटमंडपगृहंएत्यविरचितांजलिःसन्शितशराणांतीक्ष्णबाणानांयेव्रणाःक्षतानितेभ्यःमोचितःपृथ
क्कृतःकंचुकःकवचंयेनतंमृदुलेमंचेगतंविद्यमानंकलशोद्भवंद्रोणंएवंवक्ष्यमाणंअभाषत॥७५॥ हेमहारथआचार्यत्वंयस्मात्कारणात्ममवांछि 
तद्रुंमनोरथवृक्षंफलेग्रहिंसफलंनप्रतनोषिनकरोषितस्मात्कृपाइतिशब्दः त्वदीयेश्यालेपत्न्याःभ्रातरिकृपाचार्येइवत्वय्यपिह्रस्वःनूनंबभूव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा कृपाशब्दः त्वदीये श्यालेकृपइतिन्हस्वः बभूव तथा वाच्यवाचकयोरभेदात् कृपार्थोन्हस्वः अल्पो जातः किमित्यर्थः ॥७६॥ गद्य ॥ हे भगव
न् सावधानेन एकाग्रेण चेतसा इदानीं इदं वक्ष्यमाणं वचनं स्मरणपथं अधिरोपय स्थापय ॥१२॥ ॥पद्यं॥ सः पितामहोपि भीष्मोपि पृषत्कतल्पेबा
णशय्यायां निजं वपुः अंतरंगे अंतःकरणे माधवं कृष्णं तव वै वहस्ते मम कार्यसिद्धिं च कृत्वा हि कृत्त्वैव स्वं धाम स्वर्गमोक्षं वा गंतुं इयेष ऐच्छत् ॥७७॥
अथ शोकसंपदा शोकातिशयेन समेतं तं एतं दुर्योधनं दयमानेन दयाकर्त्रा नीचेतराणां महतां गुणानां अब्धिना समुद्रेण तेन गुरुणा ऊचे उक्तः ७८

ग० भगवन्निदमिदानीं स्मरणपथमधिरोपय चेतसा सावधानेन ॥१२॥ ॥प० ॥पितामहः सोपि पृषत्कतल्पे वपुर्निजं माधव
मंतरंगे ॥ तवैव हस्ते मम कार्यसिद्धिं कृत्वा हि धाम स्वमियेष गंतुं ॥ ७७॥ तमेतं दयमानेन समेतं शोकसंपदा ॥ ऊचे यगुरुणा तेन नी
चेतरगुणाब्धिना ॥७८॥ बाष्पातिवृष्टावपि पांडवानां पयोरुहव्यूहवितीर्णमोदान् ॥ प्रातः स्म एवाखिलधार्त्तराष्ट्रान्प्रचारयेयं युधि
वाहिनीषु ॥७९॥

पांडवानां बाष्पाणां दुःखाश्रूणां अतिवृष्टौ सत्यामपि पयोरुहव्यूहेन सेनायाः कमलाकाररचनेन कमलसमूहेन च विती
र्णः दत्तः मोदो हर्षो यैः तान् अखिलान् धार्त्तराष्ट्रान् दुर्योधनादीन् हंसान् श्वः परेन्हि प्रातः एव युधि वाहिनीषु सेनासु नदीषु च प्रचारयेयं गमयिष्यामि
अतिवृष्टौ सत्यां नदीषु कमलानां नाशः हंसानां संचाराभावश्च वर्त्तते तद्विपरीतं करोमीति भावः ॥ ७९॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गद्यं॥ इतिगिरातंराजातंदुर्योधनंआश्वास्यसदनायस्वावासंगंतुविसृष्टवतः अनुज्ञांदत्तवतः मुहुर्मुहुः अर्जुनस्यसव्यसाचित्वशौंडीसव्यदक्षि

गाभ्यांहस्ताभ्यांबाणप्रक्षेपरीतिंअनुचिंत्यअनणीयसींमहतींहृदिरणरणिकांभयेनउछ्वसनंबिभ्राणस्यद्रोणस्यसकाशाद्विनिर्गतांनिद्रा



॥गद्यं॥ इतिगिरातमाश्वास्यराजानंसदनायविसृष्टवतोमुहुर्मुहुरर्जुनस्य सव्यसाचित्वशौं

डीमनुचिंत्यहृदिरणरणिकामनणीयसींबिभ्राणस्यद्रोणस्यसकाशाद्विनिर्गतांनिद्रासःर्वांविचे

तुमिवसानिशापितरसानिरगात् १३ प० अपरेद्युरसौवृतोबलौघैरथभेरीनिनदैर्नभोविभिंदन्॥कवची

विशिखीरथीशरासीकलशीसूनुरवापयुद्धरंगं॥८०॥ ॥७॥ ॥७॥

सरर्वांविचेतुमिवअन्वेष्टुमिवसानिशापितरसावेगेननिरगात्॥१४॥ पद्यं॥ अथअपरेद्युःउत्तरेहनिसेनासमूहैः युतःकवचादियुतः असौक २०

लशीसूनुः द्रोणःभेरीशब्दैःनभःआकाशंविभिंदन्सन्युद्धरंगंअवाप॥८०॥ ॥७॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदनुसांयुगीनेषुरणपटुषु अग्रगण्यः गुरुः मधनभुविरणांगणे अंतरिक्षेस्थितानांदिविषदांदेवानां आश्चर्यस्यस्थूललक्ष्यंदातारंरिपूणांक्षोणींद्रा
णांराज्ञांअसवएवप्राणाएवमृगाः तेषांहरणविषयेकूटयंत्रायमाणंवागुरायंत्रवदाचरंतंकेसराढ्यैः ग्रीवागतकेशयुक्तैः गंधर्वैः अश्वैः मदेनमधु-
भिः स्कंदैः इभैः गजैश्चकेतवः ध्वजाएवपत्राणि येषांतैः शतांगैः रथैश्चपद्मव्यूहंपद्माकारसेनारचनांव्यतानीत् अकरोत् कमलेकेसरमधुपत्रा
णिसंतिअत्रकेसरस्थानेकेसरयुताश्वाः मधुस्थानेमदयुतगजाः पत्रस्थानेध्वजयुतशतांगाः कृताइत्यर्थः॥८१॥ अत्रअस्मिन्समयेतपसः सूनुः

आश्चर्यस्थूललक्ष्यंतदनुदिविषदामंतरिक्षेस्थितानांक्षोणींद्राणांरिपूणामसुमृगहरणेकूटयंत्रायमाणं॥ गंधर्वैः केसराढ्यैर्म
दमधुभिरिभैःकेतुपत्रैःशतांगैः पद्मव्यूहंव्यतानीत्प्रधनभुविगुरुःसांयुगीनाग्रगण्यः॥८१॥ समयेत्रनिवेद्यवैरिवृत्तंतपसः
सूनुरभाषताभिमन्युं॥ अयिवत्सपितान्यतोधुनातेतवभाराजनिसर्वसैन्यरक्षा॥८२॥ कवचंप्रतिमुंचधत्स्वचापंभजधैर्यंपरि
तोविधेहियोधान्॥ अधिरोहशतांगमाविशत्वंकमलव्यूहमरीन्निषूदयस्व॥८३॥ धर्मराजः अभिमन्युंवैरिणांवृत्तंअस्मत्पराजया
र्थंसेनायाः पद्मव्यूहरचनयायुद्धार्थस्थितिनिरूपंनिवेद्यअभाषत तदेवभाषणंसार्धेनाह अयिवत्सेति अयिवत्सअधुनाएतस्मिन्समयेतेपिताअर्जुनः अन्य
तः देशांतरेसंशप्तकैः सहयुद्धार्थंगतोवर्तते अतः सर्वसैन्यरक्षातवभारः अजनिजातः सर्वसैन्यरक्षात्वदधीनेत्यर्थः ८२॥ अतः त्वंकवचंप्रतिमुंचधारयचापं
धत्स्वहस्तेनगृहाणधैर्यंभजस्वस्वीकुरुयोधान्परितः स्वरक्षणार्थंसमंताद्विधेहिस्थापयशतांगंरथंअधिरोहतस्मिन्आरोहणंकुरुकमलव्यूहंविशप्रविशअरीन्निषूद
यस्वजहि ८३

गद्य॥ इतिउक्तप्रकारेणराज्ञोधर्मस्यनिदेशंआज्ञांमौलिदेशेशिरसिनिवेश्यबहुमानेनगृहीत्वेत्यर्थः प्रतिष्ठमानेकृतप्रस्थानेशत्रुजयार्थंनिर्ग
मनसमयेवादनीयाःभेरीपटहपणवाःआद्याःयेषांतैःतत्रगजवाह्याभेरीअश्ववाह्यःपटहःमनुष्यवाह्यःपणवःवाद्यैःगगनशायिनेआकाशसं
बंधिनेगुणायशब्दायसौखशायनिकायमानेत्वयासुखशयनंकृतमितिपृच्छतितस्योद्बोधंकुर्वाणेइत्यर्थः बालेएकाकिनिसौभद्रेयेअभिम

ग॰ इतिराज्ञोनिदेशंमौलिदेशेनिवेश्ययोद्धुंप्रतिष्ठमानेजयनिःसाणभेरीपटहपणवाद्यैर्गगनशायिनेगुणा
यसौखशायनिकायमानेलीलयाव्यूहगर्भमवगाह्यबालेपिस्वयमेकाकिनिनिजकोदंडदंडचंडिमसंपदाकौरव
चमूंक्षोभयमाणेसौभद्रेयेसिंधुपतिर्व्यूहमुखंपिधायस्मरहरवरलाभदर्पेणतदनुधाविनींपांडववाहिनींरुधारु
रुधे॥१४॥

न्यौस्वयंलीलयाव्यूहस्यगर्भमध्यंअवगाह्यप्रविश्यनिजकोदंडदंडस्यचंडिमसंपदारौद्रकर्मातिशयेनकौरवचमूंक्षो
भयमाणेसतिसिंधुपतिःजयद्रथःव्यूहस्यमुखंद्वारंपिधाययत्द्वारंकृत्वांतःप्रविष्टःतत्द्वारंनिरुध्यस्मरहरस्यशिवस्यवरलाभेनयोदर्पःतेनतद २१
नुधाविनींसौभद्ररक्षार्थमनुधाविनींपांडवानांवाहिनींसेनांक्रुधाक्रोधेनरुरुधे सिंधुपतिःसमुद्रोपिवाहिनींनदींरुणद्धि॥१४॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्य ॥ मध्येंतरिक्षंआकाशमध्येस्थित्वाविजयस्यकृतस्यअभिमन्योः येभुजेतगोः गर्वस्यलीलायितानिविक्रीडितानिद्रष्टृणांखेचराणांदेवानां
नेत्राणांपक्ष्मणोः युग्मेयुत्स्वरंगात् रणांगणात् उद्यद्भिः ऊर्ध्वंगच्छद्भिः स्फुरवनितानांदेवीनांपुष्पवर्षादपिपतद्भिः अधोदेशंआगच्छद्भिः वेगात्लग्नैः
संबद्धैः परागैः रेणुभिः पुष्परजोभिश्च दृढतरंयथातथाघटितेपरस्परंमेलितेसति तत्क्षणंतस्मिन्क्षणेअनिमिषताभृशंभंगुराभग्नाआसीत् मुख्य

प० उद्यद्भिर्युधरंगादपिस्फुरवनितापुष्पवर्षात्पतद्भिर्वेगाल्लग्नैः परागैर्दृढतरघटितेचक्षुषांपक्ष्मयुग्मे ॥ स्थित्वामध्यें
तरिक्षंविजयस्कृतभुजागर्वलीलायितानिद्रष्टृणांखेचराणांभृशमनिमिषतातत्क्षणंभंगुराभूत् ॥ ८४ ॥ शरशायिनै
र्द्विरदशैलमंडलैर्विपुलैर्विधायविषमांवसुंधरां ॥ पृथुचक्रवर्तिपृथुयत्नवैभवंवितथीचकारविजयस्यनंदनः ॥ ८५ ॥

समयेबहुभूमिरजउद्धतंसौभद्रवीर्यातिशयंदृष्ट्वादेवैर्वह्वीपुष्पवृष्टिः कृतेतिभावः ॥ ८४ ॥ विजयस्यनंदनः अभिमन्युः शरैः शायितैः दीर्घनिद्रांप्रा
पितैः विपुलैः पृथुलैः द्विरदाएवशैलाः तेषांमंडलैः समूहैः वसुधरांविषमांनतोन्नतांविधायकृत्वापृथुचक्रवर्तिनः पृथुनामा आदिराजातस्यपृथुय
त्नानांमहायत्नानांवैभवंमाहात्म्यंवितथीचकार व्यर्थीचकार विष्णवंशपृथुनापृथिवीपर्वतैर्नतोन्नतांदृष्ट्वाप्रजानिवासार्थमियमसमीचीनेतिज्ञा
त्वाधनुष्कोट्यापर्वतान्चूर्णीकृत्यसमाकृतेतिपौराणिकाः ॥ ८५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पार्थात्मजः अभिमन्युः शितानां तीक्ष्णानां भल्लानां बाणानां वृष्ट्या भानुस्फुतस्य कर्णस्य शतांगं रथं साभि अर्धं यथा तथा छित्वा कुरुराजगोष्ठ्यां दुर्यो
धनसभायां पितामहेन भीष्मेण उक्तं अस्य कर्णस्य अर्धरथत्वं तथ्यं चकार अर्धरथच्छेदेन अर्धः रथो यस्य तस्य भावस्तत्त्वं सिद्धं ॥८६॥ अथ धृ
तः भीमः उग्रः मन्युः क्रोधो येन सः अभिमन्युः उग्रैः शरैः द्रौणिं अश्वत्थामानं न दीर्ष्यया अभिमन्यूत्कर्षासहनेन यत् स्मितं हास्यं तस्य कांतिलक्ष्या

पार्थात्मजो भानुस्फुतस्य साभि च्छित्वा शतांगं शितभल्लवृष्ट्या ॥ पितामहोक्तं कुरुराजगोष्ठ्यां तथ्यं चकारार्ध
रथत्वमस्य ॥८६॥ अथाभिमन्युर्धृतभीममन्युर्द्रौणिं तदीर्ष्यास्मितकांतिलक्ष्यात् ॥ बाल्येनिपीतानिव पि
ष्टसारानुग्रैः शरैरुद्वमयांचकार ॥८७॥ स्फुतस्य शौर्यात्स्फुरराजसूनोरुदीर्णदिग्भ्रांतिरुदारभीतिः ॥ कृ
पस्वसुर्मंगलतंतुनैव साकं चकंपे स गुरुर्मुहूर्तं ॥८८॥ ॥छ॥ ॥छ॥ ॥छ॥

तच्छुभ्रकांतिकपटाद्धेतोः बाल्ये वयसि निपीतान्पिष्टसारान्गव्यक्षीराभावात् पिष्टसारमिश्रितरसानिव उद्वमयांचकार वमनं कारयामास ने
माः स्मितकांतयः अपि तु पिष्टसारा इति कैतवापह्नुतिः ॥८७॥ स्फुरराजसूनोः अर्जुनस्य स्फुतस्य पुत्रस्य अभिमन्योः शौर्यात् उदीर्णा उत्पन्ना दि-
ग्भ्रांतिर्यस्य सः उदारा महती भीतिर्यस्य सः प्रसिद्धः गुरुः द्रोणाचार्यः कृपस्वसुः कृपाचार्यभगिन्याः कृपीनाम्न्याः द्रोणपत्न्याः मंगलतंतुना मंग- २२
लसूत्रेण साकमेव मुहूर्तं चकंपे कंपं भेजे पतिमरणे पत्न्या मंगलसूत्रनाशात् तस्यापि भयेन कंपोत्पत्तिः ॥८८॥ ॥छ॥ ॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथजनार्णांगणेगौतमात्मजेकृपाचार्येविशिखंसुमुक्षंमोक्तुमिच्छुंभीषणंभयंकरंविबुधेंद्रपौत्रंअभिमन्युंअभिवीक्ष्यतस्यकृपस्यजननेउत्पत्तौवि
पद्यपिमरणेपिशरएवहेतुःकारणंजातंइतिमेनिरे गौतमर्षेः रेतःशरस्तंबेपपाततस्मात्कृपीकृपश्चेतियुग्ममुत्पन्नमितिभारतेतिहासः॥८९
तदाअभिमन्युयुद्धसमयेआश्चर्यकारकेषुकर्मसुकृतेष्वपिहर्षभरात् अमुष्यअभिमन्योःशिरोजबंधेकेशबंधेमुहुर्मुहुःमोक्तुंदिविआकाशेक
र्तृभूताःमोचनक्रियाकर्तृत्वंप्राप्ताःसुमनसःदृष्टाःपरंतुनाकेंद्रस्यनंदनेवनेकर्मभूताःमोचनक्रियाकर्मत्वंप्राप्ताःसुमनसःनदृष्टाःअभिमन्योःआश्च

विशिखंसुमुक्षमथगौतमात्मजेविबुधेंद्रपौत्रमभिवीक्ष्यभीषणं॥जननेविपद्यपिजनार्णांगणेशरएवहेतुरितितस्यमेनि
रे॥८९॥आश्चर्यकर्मसुकृतेष्वपिहर्षभारान्मोक्तुंमुहुर्मुहुरमुष्यशिरोजबंधे॥दृष्टास्तदासुमनसोदिविकर्तृभूतानाकेंद्रनं
दनवनेनतुकर्मभूताः॥९०॥अमुष्यकोदंडमखंडयद्रवेःसुतोरयाश्वान्ममसाथकुंभजः॥कृपःकृणत्तिस्मशरेणसारथिंव्य
पाटयत्केतुपटान्गुरोःसुतः॥९१॥

र्यकारकाणियुद्धकौशलानिदृष्ट्वानस्मिन्मुहुर्मुहुःपुष्पवर्षंकुर्वत्सुदृष्टिकर्तारःसुमनसोदेवा-
अवशेषात्दृष्टाःसुमनसःपुष्पाणिवृष्टिक्रियायाःकर्माणिसर्वपुष्पाणांव्ययात्नदृष्टानीत्यर्थः॥९०॥एकैकस्यद्रोणाचार्यादेरपिअसह्यत्वाद
भिमन्युःसर्वैर्मिलित्वाहतइत्याह अमुष्येत्यादिपंचभिः रवेःसुतःकर्णःअमुष्यअभिमन्योःकोदंडंअखंडयत्कुंभजःद्रोणःरयाश्वान्ममा
थजघान कृपःशरेणसारथिंकृणत्तिस्म चिच्छेद गुरोःसुतःअश्वत्थामाकेतुपटान्व्यपातयत्चिच्छेद॥९१॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निखिलोपिनिर्लिंपवर्गः एकाकिनः असहायस्याभिमन्योः परिभवायप्रवृत्तान् बहून् द्रोणादीन् अवेक्ष्ययथाभिमन्यौमंदारशाखिकुसुमानिकल्प
वृक्षपुष्पाणिअभ्यवर्षन्तथारिपुषुद्रोणादिषुनिंदारवंनिंदाशब्दंअभ्यवर्षन् तदाद्रोणादीन्निनिंदुरित्यर्थः॥९२॥तदाबालःविजयात्मसंभवःअ
भिमन्युःगदायाः सखासहायः गदाधरः सन्रथात् अवप्लुत्यउड्डीययुधिअमीषांद्रोणादीनांरथान्विदार्यविस्फोट्यक्षणात्केवलंमंदाक्षान्वि-

एकाकिनःपरिभवायबहून्प्रवृत्तानेतानवेक्ष्यनिखिलोपिनिर्लिंपवर्गः॥ मंदारशाखिकुसुमानियथाभिमन्यौनिंदारवंरि
पुषुनस्यतथाभ्यवर्षत्॥९२॥ रथादवप्लुत्यगदासखस्तदाविदार्यबालोविजयात्मसंभवः॥चकारमंदाक्षभृतोनकेवलंर
थानमीषांयुधितानपिक्षणात्॥९३॥ बालौततःकृतरणौधृतराष्ट्रपौत्रौभीरूपृथग्गमनकर्मणिमन्यमानः॥पार्थात्मजःस
तुपरस्परसाह्यवंतौचक्रेकृतांतपुरवर्त्मनिगंतुमुग्रे॥९४॥

शीर्णाक्षान्बिभ्रतितेमंदाक्षभृतः तान्नचकार अपितुतानपि द्रोणा
दीनपिएकेनबालेनबहूनांरथस्फोटनात्मंदाक्षंलज्जांबिभ्रतितेतथाविधान्चकार॥९३॥ ततःसःपार्थात्मजःअभिमन्युस्तःकृतरणौबालौधृ-
तराष्ट्रस्यपौत्रौदुर्योधनदुःशासनपुत्रौपृथग्गमनकर्मणिएकाकिनः गमनकर्मणिभीरूमन्यमानःसन्उग्रेभयंकरेकृतांतपुरस्ययमनगरस्यवर्त्म
निमार्गेपरस्परस्यसाह्यवंतौसाहाय्ययुक्तौचक्रे अन्योपिमार्गेभीरुंमत्वासहायंददाति उभावपिसहैवजघानेत्यर्थः॥९४॥ ॥७॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथतेप्रसिद्धाः कर्णमुखाः महारथाः महावीराः मिलिताः सर्वैर्मिलित्वाहंतव्य इत्येक मत्यंप्राप्ताः संतः कैतवं अधर्मं एत्यस्वीकृत्येत्यर्थः यौगप
द्यात् एककालावच्छेदेन अस्त्रैः मंत्रवच्छस्त्रैः एनंस्फुरनायकपौत्रं अभिमन्युंस्वयशोभिः सहपातयांबभूवुः हत्वाक्षित्यांपातयामासुः एकबाल-
स्ययुद्धेबहुभिर्महद्भिर्हतत्वात् लोकनिंदयायशःपतनं ॥ ९५॥ ॥गद्यं॥ तदनुतत्ररणांगणेतयोःसेनयोः क्ष्वेडितरुदितेअपिकौरवसेनासिंह
नादपांडुसेनारोदनशब्दावपिपरस्परस्पर्धयाजनितयाउत्पादितयापरस्परविजिगीषयेवजेतुमिच्छयेवव्योमसीमानंउदलंघयतां द्वावपिश-

अथकर्णमुखामहारथास्तेमिलिताःकैतवमेत्ययौगपद्यात्॥ स्फुरनायकपौत्रमेनमस्त्रैःस्वयशोभिःसहपातयांबभूवुः॥९५॥
गद्यं॥ ॥तदनुतत्रतयोःसेनयोःक्ष्वेडितरुदितेअपिस्पर्धाजनितयापरस्परविजिगीषयेवव्योमसीमानमुदलंघयतां॥१५॥
तदानींजगतिनियमवृद्धपरिषदूर्ध्वविक्षिप्तकरपुटजलांजलिक्षालनादिवव्यपयातमहोमहोष्मणिपूषणितौद्वावपिबलौघौ
निजनिजस्कंधावारानुसंधानायनिरगच्छतां॥१६॥

ब्दौमहांतौउद्बभूवतुरित्यर्थः॥१५॥ तदानींजगति पूषणिसूर्येनियमवृद्ध-
स्थानांत्रिकालसंध्योपासनादिनियमकर्तृषुश्रेष्ठानांपरिषदासमूहेनउर्ध्वंविक्षिप्ताःत्यक्ताःयेकरपुटजलांजलयः अर्घ्यजलांजलयः तैः क्षाल-
नादिवव्यपयातः महसः तेजसः संबंधीमहोष्मायस्यसः तस्मिन्सतिमंदोष्णेसतीतियावत् अस्तंगच्छतिसतीत्यर्थः द्वावपिबलौघौसेनास
मूहौनिजनिजान् स्कंधावारान् शिबिराणिअनुसंधायविश्रांत्यर्थंसंबंधंकर्तुंनिरगच्छतां॥१६॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्यं॥ अथअभिमन्युवधानंतरंबिडौजसः इंद्रस्यकुमारः अर्जुनोपितान् पूर्वोक्तान्त्रिगर्तानपिछिद्रत्रययुक्तानपित्रिगर्तसंज्ञसंशप्तकानपि
चक्षुरमैः बाणविशेषैः गात्रेशरीरेसहस्रगर्तान् सहस्रक्षतयुतान्विरचय्यकृत्वाहेतुंकारणंविनैवव्यथमानंचेतोयस्यतथाभूतः सन्न्यवृत्त
त्निवर्तते कारणंविनादुश्चिंतत्वमपशकुनंमत्वानिवृत्त इतिभावः ॥९६॥ अपशकुनांतराणिचजानन्नूनिवृत्त इत्याह बाष्पायतइति



प॰॥अथत्रिगर्तानपितान्क्षुरप्रैः सहस्रगर्तान्विरचय्यगात्रे ॥ विनैवहेतुंव्यथमानचेताबिडौज
सोपिन्यवृत्तकुमारः॥ ९६॥ बाष्पायतेदृष्टियुगंकराग्राच्चापोगलत्यंतरुदेतितापः॥ फलंकिमेत
स्यभविष्यतीतिविचिंतयन्धामविवेशराज्ञः॥ ९७॥ ॥छ॥ ॥छ॥ ॥छ॥

दृष्टियुगंनेत्रयुगंबाष्पायतेबाष्पंत्यजतिकराग्रात्चापंगलतिअंतः अंतःकरणेतापःउदेतिउत्पद्यते अत्रापिकारणंविनैवेतिसंबध्यते एतस्यफ
लंकिंभविष्यतीतिनज्ञायतेइतिविचिंतयन् राज्ञः धामशिबिरंविवेश॥९७॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथतत्रराजधाम्निसर्वबंधून्अश्रुनेत्रान्निशाम्यहस्वासूनोः अभिमन्योः वार्तांचश्रुत्वाधनंजयस्यअर्जुनस्यचित्तंप्रतिनापस्यअपदेशेनकपटेन-
स्वेनसमानंधनंजयइतिनाम्नासमानंतेजःअग्निःप्रविवेशेत्यर्थः पुत्रशोकेनमनसितापोबभूवेतिभावः॥ ९८ ॥ वसुधाधिपेनधर्मराजेनसंयुतःविश्वं

तत्राश्रुनेत्रानथसर्वबंधून्निशाम्यसूनोश्चनिशम्यवार्तां॥ नापापदेशेनधनंजयस्यचित्तंचुचुंब
स्वसमानतेजः॥ ९८॥ वीरंतनूजमनुचिंत्यविलापभाजंधारालदृष्टियुगलंधरणौलुठंतं॥ वाग्भि
श्चिरेणवसुधाधिपसंयुतस्तंविश्वंभरोर्जुनमपिव्यदधादशोकं॥ ९९॥ ॥ ७॥ ॥

भरः कृष्णः वीरंतनूजंपुत्रंअनुचिंत्यविलापभाजंआक्रोशंतंधारालंबाष्पधारायुतंदृष्टियुगंयस्यतंधरणौपृथिव्यांलुठंनंतंअर्जुनमपिवाग्भिःशोकशामकवचो
भिःचिरेणवहुकालेनअशोकंशोकरहितंव्यधात् अकार्षीत् किंच अर्जुनवृक्षमपिअशोकवृक्षमकार्षीत् इत्यर्थांतरेणचमत्कारः॥ ९९॥ ॥ ७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदनुशोकापनयनानंतरं इंद्रात्मजः अर्जुनः कोपात् बाहुंउदस्य ऊर्ध्वंकृत्वासमरेद्विषतांशत्रूणांद्रोणकर्णादीनांसमक्षंतस्यपुत्ररक्षकसेनामार्गरोधक
स्यसिंधूद्वहस्यजयद्रथस्यशिरः हेत्यांशस्त्रेयदिनकुर्यांतर्हिअहंतस्यांहेत्यांअग्निज्वालायांविशेयंप्रवेशंकुर्यांइतिप्रतिज्ञांअकरोत् ॥१००॥ अथ



इंद्रात्मजस्तदनुबाहुमुदस्यकोपात्सिंधूद्वहस्यसमरेद्विषतांसमक्षं ॥ हेत्यांस्वएवयदितस्यशिरोनकुर्यांतस्यांविशेयमहमित्य
करोत्प्रतिज्ञां ॥१००॥ अथवृत्तमेतदवकर्ण्यभीरवेवितताभिसिंधुपतयेप्रतिश्रवं ॥ नवगुप्तियुग्ममपिमेभरोऽर्जुनात्समरेष्वभीरितिग
भीरधीर्गुरुः ॥ १०१ ॥ इत्यनंतभट्टकृतौश्रीमतिचंपूभारतेनवमस्तबकः समाप्तिमगमत् ॥ ॥ छ ॥ ॥ छ ॥

अर्जुनप्रतिज्ञानंतरं एतद्वृत्तं अर्जुनप्रतिज्ञावृत्तांतं अवकर्ण्य दूतमुखात्श्रुत्वाभीरवेसिंधुपतयेजयद्रथायसमरे अर्जुनात् नवगुप्त्योः रक्षणाच्छादनयोः युग्म
मपिमेभरः भारः अस्ति अभीः भीतिवर्जितः तिष्ठेतिगभीराधैर्ययुताधीः बुद्धिर्यस्यसः गुरुः द्रोणाचार्यः प्रतिश्रवंप्रतिज्ञांअकरोत् ॥१०१॥ इतिश्रीखंडोपाह्व
बाजीरायात्मजनारायणसूरिविरचितायांश्रीमच्चंपूभारतटीकायांनवमस्तबकः समाप्तिमगमत् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=02.12.19 10:29
,TRANSFERRED=2019/12/02 at 10:36:47
,PAGES=51
,TYPE=STD
,NAME=S0002238
,Book Name=M-303-BHARAT CHAMPU
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection